In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत-अकाडमी-षष्ठ्यब्दग्रन्थमाला - 4

ब्रह्मश्रीः श्रीमदज्जाडादिभट्टनारायणदासमहाकविविरचितम्

श्रीहरिकथामृतम्

(राष्ट्रियसंस्कृतसंस्थानस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः

आचार्य के नीलकण्ठम्

निदेशकः

सम्पादिका

डा के वरलक्ष्मीः

उपनिदेशिका

सहसम्पादकौ परियोजना-अनुसन्धातारौ च

डा वि सुब्रह्मण्यम्, उपनिदेशकः

डा जोशी सन्तोषकुमारः, शोधसहायकः

संस्कृत अकाडमी

(राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2020

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत-अकाडमी-षष्ठ्यब्दग्रन्थमाला - 4

ब्रह्मश्रीः श्रीमदज्जाडादिभट्टनारायणदासमहाकविविरचितम्

श्रीहरिकथामृतम्

(राष्ट्रियसंस्कृतसंस्थानस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः
आचार्य के नीलकण्ठम्
निदेशकः

सम्पादिका
डा के वरलक्ष्मीः
उपनिदेशिका

सहसम्पादकौ परियोजना-अनुसन्धातारौ च
डा वि सुब्रह्मण्यम्, उपनिदेशकः
डा जोशी सन्तोषकुमारः, शोधसहायकः

संस्कृत अकाडमी
(राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2020

In Public domain. Digitization Muthulakshmi Research Academy

ŚrīHarikathāmṛtam
(Re-printing of rare book project)
This Publication is published with the financial support under Ashtadashi Scheme of Rashtriya Sanskrit Sansthan, New Delhi)

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sansthan
Osmania University Campus,
Hyderabad – 500 007

Phone & Fax:
040 - 27070281

Email:
sanskritacademyhyd@gmail.com

Web:
osmania.ac.in\sanskritacademy

Data Entry by
Smt. Bhavanam Sridevi

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

ŚrīHarikathāmṛtam
ISBN – 978-93-80171-48-7

© Sanskrit Academy

Year	:	2020
Copies	:	300
Pages	:	xxi+114
Price	:	Rs 250
		$ 25

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Shashtyabda Granthamala - 4

Brahmaśrī Śrīmadajjāḍādibhaṭṭanārāyaṇadāsa Mahākaviviracitam

ŚrīHarikathāmṛtam

(Published under 'Re-printing rare books project' of Ashtadashi Scheme of Rashtriya Sanskrit Sansthan)

Chief Editor
Prof K Neelakantham
Director

Editor
Dr. K. Varalakshmi
Deputy Director

Associate Editors and Project Investigators
Dr. V. Subrahmanyam, Deputy Director
Dr. Joshi Santosh Kumar, Research Assistant

Sanskrit Academy
Adarsha Shodha Sansthan
(Recognised by Rashtriya Sanskrit Sansthan, New Delhi)
Osmania University Campus, Hyderabad – 500 007
2020

In Public domain. Digitization Muthulakshmi Research Academy

ŚrīHarikathāmṛtam
(Re-printing of rare book project)
This Publication is published with the financial support under Ashtadashi Scheme of Rashtriya Sanskrit Sansthan, New Delhi)

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sansthan
Osmania University Campus,
Hyderabad – 500 007

Phone & Fax:
040 - 27070281

Email:
sanskritacademyhyd@gmail.com

Web:
osmania.ac.in\sanskritacademy

Data Entry by
Smt. Bhavanam Sridevi

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

ŚrīHarikathāmṛtam
ISBN – 978-93-80171-48-7

© Sanskrit Academy

Year	:	2020
Copies	:	300
Pages	:	xxi+114
Price	:	Rs 250
		$ 25

In Public domain. Digitization Muthulakshmi Research Academy

हरिकथा

श्रीहरिकथामृतम्

संस्कृतयक्षगानप्रबन्धत्रितयम्

ब्रह्मश्री श्रीमदज्ञाडादिभट्टनारायणदासविरचितम्

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

सङ्क्षिप्ताक्षरसूची

१. उ - उद्ग्राहः

२. ध्रु - ध्रुवः

३. मे - मेलापकः

४. आ - आभोगः

५. पा - पादः

६. ग - गद्यम्

७. स्व - स्वरः

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

Preface

ओऽम् श्री गुरुभ्यो नमः

॥ श्री शङ्करभगवत्पादाः विजयन्ते ॥

श्रीहरिकथामृतम् was composed by Brahmasri Ajjadadibhatla Narayanadasa. He was honoured with a title "*Harikathapitamaha*" in Andhradesha. He was a versatile scholar of various *shastras* including classical music and had good command over many languages. His parents were Sri Venkatachayani and Smt. Narasamamba. According to the introduction of श्रीहरिकथामृतम् he was born on 31st August 1864. He has written 46 books among which seven books were in Sanskrit. Sanskrit Academy has already published तारकम्, काशीशतकम्, श्रीरामचन्द्रशतकम् and now is pleased to bring out श्रीहरिकथामृतम्.

श्रीहरिकथामृतम् has three chapters with the titles श्रीकृष्णजननम्, पितृबन्धमोचनम्, धर्मसंस्थापनम्. Sri Narayanadasa was influenced by Sri Kuppuswami Nayudu, a *haridasa* from Chennai. It is said that Sri Nayudu came to Vijayanagaram in 1883 and narrated the story of *Dhruva* in the form of *Harikatha. Harikatha,* unlike other traditional discourses like *PuranaKalakshepa,* attracts every art lover in the society since the narrator *Haridasa* is generally not only home at dancing, singing but also has good power of eloquence, commanding voice and at the top of all, has a deep knowledge of ancient literature and *Lokavyavahara*. He must be very cheerful with sense of

In Public domain. Digitization Muthulakshmi Research Academy

humour and should keep the entire audience rapt throughout the *Harikatha*. Though Narayanadasa had all this in his repertoire, it was Kuppuswamy Nayudu's rendition that motivated him to become a *Haridasa*. This particular art form of *harikatha* as he was watching Nayudu, greatly impressed him. Hence, he too composed *Dhruvacharitam,* the same concept that of Nayudu's, narrated it in the public and won the hearts of entire audience in his maiden performance itself. The immense reception gave him a tremendous motivation and he went on composing eighteen *harikathas* in Telugu and **श्रीहरिकथामृतम्** in Sanskrit. The musical genius who gave the *harikathas* a new shape was duly given the title "*Harikathapitamaha*". Sri Narayanadasa was a true Aacharya with **अधीति, बोध, आचरण** and **प्रचरण.** He was the Principal of Vijayanagar Music College, the first of its kind, and he trained many disciples in the classical music and in the art of *Harikatha*. Notable disciples among them were Sri Vajapeyula Subbayya Dasu, Neti Lakshminarayana Bhagavatulu, Nemani varahaladasu, Vedanabhatla Venkataramanayya, Vadlamani Narasimhadasu, Pillalamarri Ramadasa Bhagavatar.

Sri Narayanadasa was a *vaaggeyakara*. He had composed **श्रीहरिकथामृतम्** with classical *krities* in different ragas. He was a *Bhagavatottama*. The richness and variety of his compositions in **श्रीहरिकथामृतम्** though very small in number, their poetic beauty and devotional fervour and wide range of aesthetic patterns they present, entitle him

In Public domain. Digitization Muthulakshmi Research Academy

to an exalted place among the composers of *Karnatic* music. The contents of his *krities* in this book are in praise of lord Krishna and their rasa is *Bhakti*. He explains well about *Bhakti* and *Jnana* :-

ज्ञानेन मोक्षमाप्नोति भक्तिर्ज्ञानाय कल्पते ।
कृष्णप्रसादाद्भक्तिः स्यात् तस्माच्छ्रेव्यो हरिः सदा ।।(श्रीहरिकथामृतम् - III)
तस्मात्प्रज्ञानवैराग्यभक्तितत्त्वान्यवाप्नुहि ।
तेषु श्रेष्ठां विदुर्भक्तिं मुनयः पारमेश्वरीम्।। (श्रीहरिकथामृतम्-I)

Narayanadasa was steeped in the *Advaitavedanta*: -

आत्मन्येवाविद्यया स्वप्नवस्तुप्रायं विश्वं वीक्ष्य मुह्यत्यविद्वान्। पश्यन् ज्ञानी प्रज्ञया आत्मानमेवानन्दति।। ब्रह्मविद् ब्रह्मैव भवति।। आत्मैवेदं सर्वम्।। मायायां स्वं वीक्षमाणः मूढो विमुह्यति।। (श्रीहरिकथामृतम् - III). He gives the definition of *Haridasa*:-

सात्विकाहारनिरतः सर्वभूतदयापरः।
संसारविमुखो योगी हरिदास इति स्मृतः।। (श्रीहरिकथामृतम् - III) he, at the commencement of his *Harikatha*, says that he is freed from *samsarabandha* परब्रह्मणो मुरारेश्चरित्रमेतस्यां विद्वत्संसदि कथयितुम् अद्य संसारबन्धनात् मन्दीकृतबुद्धिरहं साहसं करोमि। (श्रीहरिकथामृतम् - I).

Narayanadasa possessed all the qualities of a Vaggeyakara as defined by शार्ङ्गदेव of 1175–1247 A.D. in *Prakeernadhyaya* of his सङ्गीतरत्नाकरः -

शब्दानुशासनज्ञानम् अभिधानप्रवीणता ।
छन्दःप्रभेदवेदित्वम् अलङ्कारेषु कौशलम् ।।
रसभावपरिज्ञानं देशस्थितिषु चातुरी ।
अशेषभाषाविज्ञानं कलाशास्त्रेषु कौशलम् ।।
तूर्यत्रितयचातुर्यं हृद्यशारीरशालिता ।
लयतालकलाज्ञानं विवेकोऽनेककाकुषु ।।

In Public domain. Digitization Muthulakshmi Research Academy

देशीरागेष्वभिज्ञानं वाक्पटुत्वं सभाजये ।
रोषद्वेषपरित्यागःसार्द्रत्वमुचितज्ञता ।
अनुच्छिष्टोक्तिनिर्बन्धो नूत्नधातुविनिर्मितिः ।।
परचित्तपरिज्ञानं प्रबन्धेषु प्रगल्भता ।
द्रुतगीतविनिर्माणं पदान्तरविदग्धता ।
अवधानं गुणैरेभिः वरो वाग्गेयकारकः ।।

(Sangitaratnakara Vol.II. 3-9)

His श्रीहरिकथामृतम् is based on the story *Dashamaskandha* of *Srimadbhagavatamahapurana*. It has 315 slokas, 110 Krities(songs) and 30 prose passages in its three chapters. It reminds us श्रीकृष्णलीलातरङ्गिणी of Sri Narayana tirtha of seventeenth century A.D. Incidentally श्रीकृष्णलीलातरङ्गिणी also consists of 153 Krities 302 slokas and 31 prose passages. Narayana tirtha also has taken the theme from the *Dashamaskandha* of *Srimadbhagavatamahapurana*. While Sri Narayana tirtha has taken the story from the birth of lord Srikrishna to his marriage with Rukmini in twelve *tarangas* (chapters) Sri Narayanadasa has narrated the story of Srikrishna in three chapters and covered all the important incidents in the story of Srikrishna. The aim of both Narayanatirtha and Narayandasa looks similar i.e. highlighting the story of lord Krishna through Indian traditional music: *Karnatakasangeeta*. These two have followed the trend set by great Vaggeyakaras like Jaydeva, Annamayya, Ksetrayya, Tyagaraja, Muttuswami dikshita and others who composed *Krities* in Sanskrit. We see even the influence of Sri Leelashuka's *Srikrishnakarnamritam* and *Andhramahabhagavatam* of

In Public domain. Digitization Muthulakshmi Research Academy

legendary Telugu poet Sri Potanamahakavi in the text of **श्रीहरिकथामृतम्.** *Vaggeyakaras* generally have their *Mudra* in each of their *Krities*. Muttuswami dikshita has his mudra as '*Guruguha*', Tyagaraja has '*Tyagaraja*' Annamayya uses '*Venkatesha* or *Venkateshwara*', and here Narayanadasa uses his name itself as his *mudra* '*Narayanadasa*' in his *krities* like Sri Narayanatirtha. For ex: "**भासमाननारायणदाससत्प्रणीतम्, वृणुत नारायणदासविहितम् नारायणदासं श्रुणु नाकैश्वर्यं वृणु**"

While emotion plays an important role in the *Krities* of Annamayya and Tyagaraja aesthetic excellence plays a dominant role in the *Krities* of Muttuswamy dikshita, Narayanatirtha and Srimadajjadadibhatla Narayanadasa. When compared to the other Vaggeyakaras, Narayanadasa excels all others in the छन्दोविचिति knowledge of prosody, for he composed verses in several varieties of metres in श्रीहरिकथामृतम्.

To conclude this I would say that this precious work, श्रीहरिकथामृतम् needs a special attention of research scholars to make a thorough study of its poetic beauty and I request all the *sahridayas* in the words of Sri Adibhatla Narayanadasa:-

श्रूयतां (पठ्यताम्) नारायणचरितं पीयतां श्रीहरिकथामृतम् ॥

I appreciate the honest efforts of Dr. K. Varalakshmi, Deputy Director of the academy, who made a thorough study of this श्रीहरिकथामृतम् and following the advice of research committee of the academy, added certain important points like the list of Vrittas with critical notes

In Public domain. Digitization Muthulakshmi Research Academy

wherever required, index of slokas and briefing the stories of three chapters etc. She is well versed in Sanskrit research and computational linguistics.

I also acknowledge the integrity and determination amicable deputy director Dr. V. Subrahmanyam in charge of project of reprinting of rare books and a faithful researcher Dr. Joshi Santosh Kumar, research assistant in the academy for their valuable assistance in getting this श्रीहरिकथामृतम् published.

I greatly think of the encouragement of Prof. P.N. Shastry sir Vice-chancellor and Prof. Subrahmanya Sharma Registrar, Central Sanskrit University, New Delhi (formerly Rashtriya Sanskrit Sansthan) who are the main instruments in allotting this project to Sanskrit Academy, I thank Prof. Gopal Reddy, Registrar, Osmania University for his motivation in the publications of Sanskrit Academy.

I, on behalf of Sanskrit Academy, offer my sincere thanks to Smt. Upadhyayula Rajarajeswari, great granddaughter of Sri Adibhatla Narayanadasa for permitting us to publish this book. I thank Smt. Bhavanam Sridevi who has done the D.T.P work and also Karshak Art Printers, Vidyanagar, Hyderabad for printing it beautifully.

Prof. Neelakantham

Director

In Public domain. Digitization Muthulakshmi Research Academy

भवभयतारकं श्रीहरिकथामृतम्

"ज्ञानादेव हि कैवल्यम्" इति आर्योक्तिः। प्रशस्तोऽपि ज्ञानमार्गः तावन्न सुकरः। सुलभगम्यस्तु भक्तिमार्गः। अत एव **"कलौ भक्त्या मुक्तिरि"**ति आभाणकमपि प्रख्यातिं गतम्। **"भज सेवायाम्"** इति धातोः निष्पन्नोयं भक्तिः इति शब्दः।

अनन्यममता विष्णौ ममता प्रेमसङ्गता ।
भक्तिरित्युच्यते भीष्मप्रह्लादोद्धवनारदैः ॥ इति नारदपञ्चरात्रे भक्तेः निर्वचनमुक्तम्। शिवानन्दलहर्यां सुन्दरैरुपमानैः भक्तितत्त्वमूचुः शङ्कराचार्यः -

अङ्कोलं निजबीजसन्ततिरयस्कान्तोपलं सूचिका
साध्वी नैजविभुं लता क्षितिरुहं सिन्धुस्सरिद्वल्लभम् ।
प्राप्नोतीह यथा तथा पशुपतेः पादारविन्दद्वयं
चेतोवृत्तिरुपेत्य तिष्ठति सदा सा भक्तिरित्युच्यते ॥ (शि.ल.६१)

इयं भक्तिर्नवधेति व्यासमहर्षिः भागवते उपदिदेश ।

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ।
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा
क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम् ॥ (श्रीमद्भा. ७.५.२३,२४)

हरिकथासम्प्रदायः - नवविधभक्तिप्रचाराय हरिकथासम्प्रदायः समुद्भूतः। हरिकथां यः प्रदर्शयति सः हरिदासः इत्युच्यते। अस्य सम्प्रदायस्य आद्यः प्रवर्त्तकः देवर्षिः नारदः एव इति जगद्विदितविषयः। सम्प्रदायोऽयं कर्णाटकतमिलनाडु-महाराष्ट्रान्ध्रतेलङ्गाणाराज्येषु अतीव लोकप्रियः आसीत्। श्रीमदज्झाड आदिभट्ल नारायणदासः आन्ध्रदेशे हरिकथासम्प्रदायप्रवर्त्तकः इति विश्रुतः। आन्ध्रदेशे

In Public domain. Digitization Muthulakshmi Research Academy

श्रीकाकुलमण्डले अज्ञाडनामके ग्रामे आदिभट्लाभिधाने पवित्रे द्राविडब्राह्मणवंशे वेदवेदाङ्गाध्ययनसम्पन्नस्य षट्कर्मनिरतस्य सनातनधर्मपरस्य पुराणप्रवाचकस्य च वेङ्कटचयनुलु नाम्नः पण्डितप्रवरस्य नरसमाम्बायाश्च पुत्ररूपेण सूर्यनारायणनाम्ना समुत्पन्नः कालक्रमेण नारायणदास इति प्रथितश्चायं पुम्भावसरस्वतीति वक्तुं शक्यते।

''रक्ताक्षिसंवत्सरे श्रावणकृष्णचतुर्दशीसौम्यवासरे (३१-८-१८६४) पूर्वरात्रौ दशघटिकोपरि माघनक्षत्रचतुर्थचरणे पार्वतीपुरे प्राग्दिश्येकयोजनदूरे सुवर्णमुखीनदीतीरस्थिताज्ञाडग्रामेऽहमुद्बभूव किल''..... इति स्वयं नारायणदासः श्रीहरिकथामृतमिति प्रबन्धे लिलेख। अयं बाल्यावस्थायामेव पितृमुखात् सकृत् श्रुतान् श्लोकान् एकश्रुतग्राहित्वात् पुनः श्रावयति स्म। चतुर्दशवर्षीयोऽयम् उन्नतविद्याभ्यासार्थं विजयनगरं जगाम। सङ्गीतनृत्याभिनयादिकलाः संस्कारवशात् स्ववशङ्गता बभूवुः।

हरिकथाप्रदर्शनानि - १८८३ क्रैस्तवाब्दे चेन्नपुरीतः कुप्पुस्वामिनायुडुनाम्ना हरिदासो विजयनागरमागत्य ध्रुवचरित्रनाम्नीं हरिकथां नृत्यन् गायन् प्रादर्शयत्। तेन प्रेरितः सूर्यनारायणः स्वयं ध्रुवचरित्रनाम्नीं हरिकथां रचयित्वा सङ्गीतसाहित्यनृत्यादीनि मेलयित्वा वेणुगोपालमन्दिरे प्रादर्शयत्। सैव तस्य प्रथमा कृतिः तच्च प्रथमं प्रदर्शनमास्ताम् तत आरभ्य सूर्यनारायणः नारायणदास इति प्रथितः। आन्ध्रदेशे ओरिस्साराज्ये चेन्नपुर्यां कर्णाटराज्ये कोलकत्तायाञ्च नैकानि हरिकथाप्रदर्शनानि चकारायं नारायणदासः।

''आस्तिक्यं धर्माधर्मांश्च सर्वजनमनोरञ्जकतया नृत्यगीतवाद्यैः या प्रदर्श्यते सैव हरिकथा यश्च प्रस्तौति स एव हरिकथायाः कथकः। दैवभक्तिः सत्यं भूतदया चेति हरिकथायाः विशेषांशाः। केभ्यश्चित् वर्षेभ्यः महाराष्ट्रादिषु नैकेषु राज्येषु सङ्गीतसाहित्यविशारदाः आजीविकायै कथकवृत्तिमवलम्ब्य हरिभक्तवेषं धृत्वा दैवभक्तिं धर्माधर्मांश्च जनान् बोधयन्तः पौराणिकाः कथकाः भागवताः दासाश्चेति संज्ञाः लभन्ते। हरिकथाश्रवणेन श्रोतारः अखिलश्रेयोभिवृद्धिं

In Public domain. Digitization Muthulakshmi Research Academy

हरिकथाकथकाश्च पुरुषार्थसिद्धिञ्च प्राप्नुवन्ति। श्रुतिस्मृतिविज्ञानं शब्दानुशासनज्ञता, अभिधानप्रावीण्यं सर्वकाकुविशारदत्वं कलाशास्त्रनैपुण्यं तूर्यत्रितयचातुर्यं हृदयशरीरशालिता लयकालसंज्ञानं प्रभूतप्रतिभोद्भूतभाक्त्वं सुभगगीयता, देशीयरागाभिज्ञत्वम् अनुच्छिष्ठोक्तिनिर्बन्धः नूत्नधातुविनिर्माणदक्षता परचित्तपरिज्ञानं प्रबन्धप्रगल्भता द्रुतगीतविरचनानैपुण्यं पद्यान्तरविदग्धता त्रिस्थानगमकप्रौढिमा विविधालप्तिनैपुण्यं विशेषावधानशक्तिः रम्यरूपं स्वेच्छासञ्चारः स्वतन्त्रजीवनञ्चेति वाग्गेयकारस्य उत्तमकथकस्य लक्षणानि'' इति क्रि.श.१९११ तमे वर्षे आन्ध्रपत्रिकायाः युगादिसञ्चिकायां मुद्रिते 'हरिकथा' इति प्रबन्धे स्वयं नारायणदासः व्यवृणोत्।

हरिकथापितामहः - क्रि.श.१९१४ तमे वर्षे बन्दरुनगरे प्रवृत्तेन नारायणदासस्य हरिकथाप्रदर्शनेन चेल्लपिल्ल वेङ्कटशास्त्री सन्तुष्टान्तरङ्गस्सन् **''हरिकथापितामह''** इति बिरुदं तस्मै प्रादात्।

सङ्गीतकलाशालाध्यक्षः - क्रि.श. १९१९ तमे वर्षे विजयनगराधिपतिः विजयरामगजपतिः सङ्गीतकलाशालां संस्थाप्य नारायणदासं तत्प्रांशुपालं चकार। क्रि.श. १९३६ तमे वर्षे कलाशालायाः अध्यक्षपदवीतः निवृत्तः। हरिकथासम्प्रदायस्य प्रचारप्रसारे कटिबद्धोऽयं बुधाग्रणीः नैकान् शिष्यान् हरिकथाविद्यया अनुगृहीतवान्। नारायणदासस्य सुदीर्घशिष्यपरम्परा अद्यावधि विराजते आन्ध्रदेशे तेलङ्गाणादेशे च।

बिरुदानि - **''आन्ध्रदेशभूषणम्''**, **''लयब्रह्म''**, **''सङ्गीतसार्वभौमः''**, **''आटपाटलमेटि''**, **''शृङ्गारसर्वज्ञः''** इत्यादिभिः बिरुदैः नारायणदासः सत्कृतः। क्रि.श. १९३९ तमे वर्षे चेल्लपिल्ल वेङ्कटशास्त्रिकरकमलाभ्याम् आन्ध्रविश्वविद्यालयपक्षतः **''कलाप्रपूर्ण''** इति बिरुदेन नारायणदासः पुरस्कृतः। विजयनगरमहाराजैः मैसूरुमहाराजेन नैकत्र नैकैः विद्वद्भिश्चायं सम्मानितः।

दासवाङ्मयम् - नारायणदासः षट्चत्वारिंशतः सङ्ख्याकान् ग्रन्थान् रचयामास। अनुवादग्रन्थाः हरिकथागानप्रबन्धाः स्वतन्त्रकल्पनाग्रन्थाः वेदान्तग्रन्थाश्चेति नारायणदासस्य रचनाः चतुर्धा भवन्ति। नारायणदासः अधिकतया तेलुगुभाषया

In Public domain. Digitization Muthulakshmi Research Academy

रचनाः लिलेख। गीर्वाणभाषया अल्पसङ्ख्याकाः रचनाः एव स चकार। परं प्रभूतं संस्कृतसाहित्यम् आन्ध्रभाषया अनूदितवान्। अपिच संस्कृतसाहित्याधारेण आन्ध्रभाषया स्वतन्त्रकल्पनारचनाः वेदान्तग्रन्थरचनाश्च चकार।

संस्कृतवाङ्मयम् - १. काशीशतकम् २. चातुर्वर्ग्यसाधनम् (अलभ्यम्) ३. तारकम् ४. दशविधरागनवतिकुसुममञ्जरी ५. मृत्युञ्जयाष्टकम् ६. रामचन्द्रशतकम् ७. श्रीहरिकथामृतम्

हरिकथावाङ्मयम् - नारायणदासेन संस्कृतपुराणेतिहाससाहित्याधारेण चतुर्दश हरिकथाः विरचिताः।

१. अम्बरीषचरित्रम् २. गजेन्द्रमोक्षणम् ३. गोवर्धनोद्धारः ४. गौरप्पपेण्डि्ल ५. जानकीशपथः ६. ध्रुवचरित्रम् ७. प्रह्लादचरित्रम् ८. भीष्मचरित्रम् ९. मार्कण्डेयचरित्रम् १०. यथार्थरामायणम् ११. रुक्मिणीकल्याणम् १२. सावित्रीचरित्रम् १३. हरिश्चन्द्रोपाख्यानम् १४. श्रीहरिकथामृतम्

श्रीहरिकथामृतम् - नारायणदासः श्रीकृष्णजननमिति हरिकथागानप्रबन्धं क्रि.श.१८९८ तमे वर्षे चकारेति तस्य प्रदर्शनं क्रि.श.१९१३ तमे वर्षे संस्कृताङ्गलहिन्दीभाषाभिः कोलकत्तायां विश्वकवेः रवीन्द्रस्य समक्षं चकारेति ज्ञायते। तच्च प्रदर्शनं रवीन्द्रस्य प्रशंसापात्रतां गतमिति हरिकथागानमपि शान्तिनिकेतनस्य पाठ्यांशत्वेन गृहीतमिति च नारायणदासस्य जीवनचरितेन ज्ञायते। कीर्त्तनानि श्लोकाः गद्यञ्चेति त्रिविधरचनाप्रक्रियोपेतं श्रीहरिकथामृतं क्रि.श.१९३० तमे वर्षे तेलुगुलिप्या प्राकाश्यं नीतम्।

हरिकथामृतस्य इतिवृत्तम् - द्वादशस्कन्धभूषितस्य भागवतपुराणस्य दशमस्कन्धस्थं कृष्णचरितमितिवृत्तरूपेण स्वीकृत्य प्रबन्धोऽयं विरचित इति नारायणदासः उल्लिलेख।

पुराणं श्रीभागवतं द्वादशस्कन्धभूषितम् ।
दशमे तत्र सम्भूतं कृष्णस्य चरितामृतम् ॥ (हरिकथामृतम्. १.४६)

In Public domain. Digitization Muthulakshmi Research Academy

श्रीकृष्णजननं पितृबन्धनमोचनं धर्मसंस्थापनञ्चेति त्रयाणां संस्कृतयक्षगान-प्रबन्धानां सङ्कलनरूपमेव श्रीहरिकथामृतमिति नाम्ना प्रख्यातिं गतम्।

प्रथमबिन्दुः श्रीकृष्णजननम् - मुनिशापग्रस्तस्य परीक्षिन्महाराजस्य प्रार्थनामङ्गीकृत्य शुकमहर्षिः नारायणचरितं भणति। कंसदुश्चरितैः भीताः देवाः नारायणं तुष्टुवुः। प्रसन्नः नारायणः तेभ्यः देवेभ्यः अभयप्रदानं चकार। मथुरानगराधिपस्य उग्रसेनप्रभोः कंसाख्यः पुत्रः देवकी नाम्नी पुत्री चास्ताम्। देवक्याः विवाहः वसुदेवाख्येन सह सम्पन्नः। नूतनदम्पतीसमर्चनाभिलाषी कंसः तौ स्वगृहं प्रति नेतुं रथसारथ्यमातनोत्। कंसः देवक्याः कनिष्ठसुतेन व्यापादयिष्यते इति अशरीरवाणीं श्रुत्वा तौ नूत्नदम्पती कारागारे बबन्ध। देवकीगर्भात् जातान् सप्त शिशून् क्रूरमतिः कंसः निष्करुणं जघान। देवक्याः अष्टमशिशुरूपेण नारायणः अवततार। देवकीवसुदेवौ नारायणं स्वीयपुत्रं तुष्टुवाते। कंसं प्रहणिष्यामि। बन्धनात् युवां प्रमोचयिष्यामि। नन्दात्मजां समाकृष्य तत्स्थाने मां निवेशय। भद्राणि प्राप्नुवन्तु भक्ताः इति भगवान् नारायणः उक्त्वा पूर्ववत् सामान्यार्भकरूपं दधार। अनेन घट्टेन श्रीकृष्णजननमिति प्रथमबिन्दुः समाप्तिं गच्छति। मध्येकथम् ''अहिंसा परमो धर्मः'' इत्युपदेशपरकं कपोताख्यानमपि निवेशयति नारायणदासः इति अस्य प्रथमबिन्दोः विशेषः।

द्वितीयबिन्दुः पितृबन्धमोचनम् - नारायणादेशानुसारं वसुदेवः यमुनां तीर्त्वा नन्दव्रजमुपगम्य यशोदासूतिकागृहं प्रविश्य तस्यास्सद्योजातां कन्यकामादाय तत्स्थाने निजडिम्बकं निवेश्य कारागारं प्रत्याजगाम। शिशुरोदनं श्रुत्वा जागरिताः भटाः कंसं निवेदयामासुः। कन्यकां दृष्ट्वा विस्मित्यापि कंसो तां हन्तुमुद्युक्तः। सा कन्यका दूरमुत्क्षिप्य दुर्गारूपं धृत्वा नारायणः त्वादृशक्रूरान् हन्तुं क्वचिद्वर्धते इति कंसमुक्त्वा अन्तर्हिता। मरणभीत्या कंसः निद्राविहारेषु सुखं न विवेद। कंसप्रेरिता पूतना व्रजवासिनं कृष्णं विषस्तन्यं पाययित्वा मारयितुं प्रायतत। विषस्तन्येन साकं तस्याः असूनपि जहार शिशुः कृष्णः। कदाचित् तृणावर्तासुरः चक्रवातो भूत्वा अर्भकम् आहृतः। यशोदाप्रमुखगोपाङ्गनाः दुःखविह्वलाः भूत्वा चक्रवातम् अनुसस्नुः। ग्रामस्यान्तिकात् विगतासोः राक्षसस्योरसि क्रीडन्तं निजसुतं दृष्ट्वा ननन्द नन्दसती।

In Public domain. Digitization Muthulakshmi Research Academy

वसुदेवनियोगात् व्रजमुपगतः गर्गः ज्योतिश्शास्त्रवित् ज्येष्ठस्य बलराम इति कनिष्ठस्य कृष्ण इति च नामकरणं चकार। कालियमर्दनादीः मनोहराः कृष्णलीलाः हृदयावर्जकशैल्या कविना वर्णिताः अस्मिन् द्वितीयबिन्दौ। कंसाज्ञां शिरसि धृत्वा अक्रूरो बलरामकृष्णौ मथुरामानयामास। मल्लयुद्धं प्रति आहूतः कृष्णः राजसभायां कंसं व्यापादयित्वा निजपित्रोः देवकीवसुदेवयोः बन्धनानि मुमोच।

तृतीयबिन्दुः धर्मसंस्थापनम् - काश्यां बलरामकृष्णयोः अध्ययनं जरासन्धविजयः शत्रुसुगमस्य मथुरापुरस्य त्यागः द्वारकापुरनिवासः सत्राजितः शमन्तकमणिहरणं कृष्णे तद्धरणस्य निन्दारोपणं शमन्तकमणिप्राप्तये जाम्बवतेन युद्धं जाम्बवतीपरिणयः सत्राजिते शमन्तकमणेः प्रत्यर्पणं सत्याभामापरिणयः नरकासुरवधः कुचेलोपाख्यानम् अन्ते नारदस्य कृष्णसङ्कीर्तनेन परिसमाप्तिश्चेति तृतीयबिन्दोः विशेषाः।

हरिकथामृते प्रयुक्तानि वृत्तानि - गीतिः शार्दूलविक्रीडितं कोरकं वंशस्थं फलवृत्तं स्रग्धरा पञ्चचामरः मालिनी हरिणी श्लोकः मत्तेभं समवृत्तं वसन्ततिलका उपजातिः मत्तेभविक्रीडितं माधवीवृत्तं भुजङ्गप्रयातम् इन्द्रवज्रा सीसं तेटगीतिः पृथ्वी शिखरिणी महास्रग्धरा द्रुतविलम्बितं तन्वी शालिनी तोटकम् इति विभन्निवृत्तैः श्लोकान् ग्रथयामास कविः। गन्थस्यान्ते वृत्तसूची प्रदत्ता।

दण्डकवृत्तम् - श्रीहरिकथामृतस्य वृत्तप्रयोगविशेषेषु विशिष्यते दण्डकाभिधं वृत्तम्। गद्यकाव्यमूलकं दण्डकाभिधमिदं नारायणदासस्य पाण्डित्यगरिम्णः निकषायते। यतः सकलेऽपि संस्कृतकाव्यसाहित्ये केवलम् अल्पसङ्ख्याकानि दण्डकवृत्तनिबद्धोदाहरणानि उपलभ्यन्ते।

दण्डकसाहित्यम् - वेदान्तदेशिकः दण्डकाभिधवृत्तोपेते गरुडदण्डके गरुडं भवभूतिः मालतीमाधवे (मा.मा. अ.५ श्लो.२३) भगवतीं चामुण्डीं सङ्ग्रामाभिधेन दण्डकेन च अस्तुवताम्। वृत्तरत्नाकरादिषु छन्दःशास्त्रग्रन्थेषु उदाहरणरूपेण केचन दण्डकाः प्रस्तुताः। तद्विहाय नेतराः दण्डकाः काव्यजगति नोपलभ्यन्ते इति 'Dandaka: A Unique Metre' (by Prof. Gouri Mahulikar) इति शोधलेखे उल्लिखितम्। स्तोत्रसमुच्चयनामके ग्रन्थे हयग्रीवदण्डकं केशवसूरिकृतमहालक्ष्मीदण्डकम्, कालिदास-

In Public domain. Digitization Muthulakshmi Research Academy

विरचितश्यामलादण्डकम्, गुसाईंजीकृतदण्डकम्, स्कन्दपुराणस्थं जगन्नाथदण्डकम् रामदण्डकं हेमकामाक्षीदण्डकञ्च (sanskritdocuments.org) अन्तर्जालपुटे समुपलभ्यन्ते।

वर्णिकवृत्तमस्ति दण्डकः। समवृत्तप्रभेदेषु अन्यतमश्च। गणरहितं वृत्तप्रयोगहीनञ्च भवति गद्यम्। गुरुलघुगणसहितं वृत्तप्रयोगोपेतं गद्यं दण्डकः इति व्यवह्रियते। एष एव गद्यदण्डकयोर्भेदः। चण्डवृष्टिप्रपातः प्रचितश्चेति दण्डकस्य मुख्यभेदौ स्तः। द्वयोः नैके प्रभेदास्सन्ति।

चण्डवृष्टिप्रपाताख्यो दण्डको नगणद्वयात्।
रगणैः सप्तसङ्ख्यैः स्यात् अर्णस्त्वष्टाभिरुच्यते।
अर्णवो नवभिर्ज्ञेयो व्यालस्तु दशभिर्भवेत्।
जीमूत एकादशभिः सूर्यैर्लीलाकरो भवेत्।
प्रचितकसमभिधो धीरधीभिः स्मृतो दण्डको नद्वयादुत्तरैः सप्तभिर्यैः।।

(वृ.र. अ.३)

नगणद्वयप्रयोगानन्तरं सप्तभिः रगणैः यत्र रचितं भवेत् सः चण्डवृष्टि-प्रपाताभिधः दण्डकः। रगणवृद्ध्या चण्डवृष्टिप्रपाताख्यः दण्डकः नैकधा भवति। यत्र प्रतिचरणं नगणद्वयात् सप्तभिः यगणैः रचितं भवेत् सः प्रचितकदण्डकः भवेत्। यगणवृद्ध्या प्रचितस्य नैके भेदाः भवन्ति। कविप्रयोगात् अन्यैः गणैरपि दण्डकाः विरच्यन्ते इति छन्दःशास्त्रविदां मतम्। तन्मतानुसारं कविः नारायणदासः नगणजगणतगणरगणैः एकं दण्डकं नगणयगणैः अपरं दण्डकञ्च व्यरचयत्।

श्रीहरिकथामृतस्य प्रथमतृतीयबिन्द्वोः अन्ते दण्डकः लक्ष्यते। नगणः जगणः ११३ तगणाः १५ रगणाश्च प्रयुक्तास्सन्ति प्रथमबिन्दुस्थे दण्डके। **'जयजयसर्वलोकेश सर्वज्ञ सर्वान्तरात्मन् जगत्सृष्टिसंस्थापनोत्पाटनप्राभवस्फारचक्रादिनानायुधोपेत-दुर्वारसंसारजीमूतवातूलवेदान्तवेद्यप्रभो... प्रभो कृष्ण गोविन्द मां पाहि तुभ्यन्नमः'**।। (श्रीह.क.१ पृ.सं.३८) तथैव तृतीयबिन्दुस्थे दण्डके नगणः १२७ यगणाः लगौ

In Public domain. Digitization Muthulakshmi Research Academy

च सन्ति। **'जयजयदामोदरश्रीधरां भोजनाभासुरेभाढ्यहर्याभविष्णो रमालङ्करिष्णो... वन्दारुमन्दारगोविन्द तुभ्यं नमः'**।। (श्रीह.क.३ पृ.सं.९५)

असामानप्रतिभाविशेषसम्पन्नः कविः नारायणदासः भक्तिरसप्रपूर्णदण्डकाभ्याम् श्रीहरिम् अस्तुवत्। रचनायामस्यां कृतः दण्डकादिवृत्तानां प्रयोगः कवेः छन्दःशास्त्र-पाण्डित्यप्रतिभां प्रमाणयति।

हरिकथामृते प्रयुक्ताः रागाः - भैरवीरागः - कल्याणी - आदीः, केदारगौडः - रूपकः, खरहरप्रिया - मिश्रः, सावेरिः - एकतालः, काफी - त्र्यस्रः, झंझाटी - त्र्यस्रः, शुभपन्थवरालिः - चतुरश्रः, वसन्तः - चतुरश्रः, कमाच् - चतुरश्रः, केदारः - त्रिपुटः, धनश्रीः - त्र्यस्रः, काम्बोजी - रूपकः, बिलहरिः - त्र्यस्रः, सिंहेन्द्रमध्यः - त्र्यस्रः, श्रीः - चतुरश्रः, मुखारिः - आदिः, सुरटः - त्रिपुटः, नवरोजुः - चतुरश्रः, मञ्जरी - धनश्रीः - चतुरश्रः, मञ्जरी - आनन्दभैरवी - चतुरश्रः, यदुकुलकाम्बोजी - रूपकः, मञ्जरी - पूर्वकल्याणी - त्र्यस्रः, मधुरगतिः - वसन्तरागः - खण्डः, मञ्जुगतिः - केदारगौडः - चतुरश्रः, बेगडः - चतुरश्रः, मञ्जरी - भैरवः - चतुरश्रः, वराली - मिश्रः, कर्नाटः - एकः, मञ्जरी - मालवगौडः - मिश्रः, तोडिः - रूपकः, मञ्जरी - मलयमारुतः - खण्डः, चक्रवाकः - त्र्यस्रः, ब्रह्मा - हंसध्वनिः - त्र्यस्रः, त्र्यम्बकः - भैरवी - चतुरश्रः, दिक्पालकाः - ब्यागः - चतुरश्रः, ब्रह्मर्षयः - सावरिः - त्रिपुटः, मङ्गलमहाश्रीः, नारदः - नाटकुरञ्जी - चतुरश्रः, पूर्वकल्याणी - एकतालः, कल्याणी - रूपकः, हुसेनिः - रूपकः, असावरिः - अड्डतालः, मञ्जुगतिः - नाथनामक्रियः - चतुरश्रः, नाटकुरञ्जी - रूपकः, मञ्जरी - पूर्वकल्याणी - चतुरश्रः, पुन्नागवरालिः - त्र्यस्रः, धनश्रीः - चतुरश्रः, नीलाम्बरी - त्रिपुटः, तोडिः - रूपकः, खरहरप्रिया - चतुरश्रः, नवरोजुः - त्र्यस्रः, श्रीः - मिश्रः, अठाणः - रूपकः, बेगाडः - रूपकः, केदारगौडः चतुरश्रजातिरूपकः, बेहाग् - मिश्रः, आनन्दभैरवी - त्रिपुटः, बिलहरिः - मञ्जरी - चतुरश्रः, तोडिः- सङ्कीर्णजातिः - त्रिपुटः, कन्नडा - मञ्जरी - चतुरश्रः, मोहनः - मञ्जरी - चतुरश्रः, सारङ्गः - रूपकः, हिन्दुस्थानीभैरवी - रूपकः, शहना - रूपकः, अमृतलहरी - चतुरश्रः इत्यादिषु रागेषु कीर्त्तनानि व्यरचयत् नारायणदासः।

In Public domain. Digitization Muthulakshmi Research Academy

भिन्नवृत्तग्रथितैः श्लोकैः वेदान्तबोधनपरकैः सुभाषितैः श्रवणपेयैः नैकरागबद्धैः कीर्तनैः बाणशैल्या ललितपदगुम्फितैः गद्यभागैश्च भूषितमिदं श्रीहरिकथामृतं विद्वन्मानसं नूनं हरतीत्युक्तौ नास्त्यतिशयोक्तिः। क्रि.श. १९३० तमे वर्षे तेलुगुलिप्या प्राकाश्यं नीतस्य यक्षगानप्रबन्धस्यास्य श्रीहरिकथामृतस्य देवनागरिलिप्या पुनर्मुद्रणं कर्तुं सङ्कल्पितवते अस्मत्संस्थानिदेशकाय अस्मत्प्रचोदकाय गुरुकल्पाय प्राचार्याय नीलकण्ठमहाभागाय साञ्जलिरहं कृतज्ञतासुमं समर्पयामि। दुर्लभसंस्कृतग्रन्थपुनर्मुद्रण-परियोजनासंयोजकौ सन्तोषसुब्रह्मण्यमहोदयौ सस्नेहं कार्तज्ञं निवेदयामि।

डॉ. के. वरलक्ष्मीः
उपनिदेशिका
संस्कृत अकाडमी
उस्मानियाविश्वविद्यालयः

In Public domain. Digitization Muthulakshmi Research Academy

प्रस्तावना

अमुष्य ग्रन्थस्य नाम हरिकथामृतम् इति। हरेः कथामृतमिति षष्ठीतत्पुरुषो वा, हरिकथा एव अमृतमिति अवधारणपूर्वपदकर्मधारयो वा अस्य समासो वक्तुं शक्यः।

भूयः शृणुष्व विप्रेन्द्र माहात्म्यं कलापतेः।
कस्य नो जायते प्रीतिः श्रोतुं **हरिकथामृतम्**।।

इति नारदीयमहापुराणस्थसनकवचनानुसारं हरिकथामृतशब्दे उपरि निगदितसमासद्विकं परिदृश्यते। चराचरजगतः स्रष्टुः परात्परस्य कथा कस्मै अमृततुल्याय न भवति। ग्रन्थकृत्तावत् हरिकथामृतमिति कृतेः नामकरणेन मुरारेः श्रवणकीर्तनपुरस्कृताकृतिरियमिति अभिव्यञ्जयन् किञ्चित् अपरेण विशिष्टाभिधानेन कृतेर्वैशिष्ट्यमभिव्यञ्जयितुमभिप्रैतीति प्रतिभाति।

हरेः लीलानां प्रचाराय उपयुज्यमानः कश्चित्कलासम्प्रदायः आर्यवर्तस्य दक्षिणापथि आबहोः कालात् ख्यात आस्ते। इयं हरिकथा नाम्ना कीर्त्यते। ग्रन्थकृदयं कृतिनामुया हरिकथा इति कलासम्प्रदायस्य संस्कृतभाषया प्रदर्शनपुरस्सरं हरेः कथां कथयति। हरिकथाकारः 'हरिदासु' इति नाम्ना अथवा 'हरिदास' इति नाम्ना कीर्त्यते एनयोस्तेलुगुप्रान्तयोः। सोऽयं हरिदासः न केवलं स्वप्रतिभया अपि तु स्वीयेन वेषधारणेनापि प्रेक्षकान् रञ्जयति। तस्य वेषः इत्थं वरीवर्ति।

चञ्चत्तालसुरम्यवाद्यविलसत्पाणिं झनत्किङ्किणी-
मञ्जीरार्चितपादपल्लवयुगं क्षौमाम्बरालङ्कृतम् ।
कण्ठे हारमनोहरं सुतिलकं फालेऽच्युतस्तोत्रकृत्-
भक्तश्रेणिसमावृतं मुरहरेर्दासं समालोकये ।।

'हरिकथा इतीयं प्रक्रिया तमिलदेशे कथाकालक्षेपयुक्तं सङ्गीतप्रधानं चेत्, कन्नडदेशे प्रवचनभरितं दृश्यते। मराठीप्रान्तेषु तु इयं भक्तिप्रधाना चेत् तेलुगुप्रान्तयोः भक्तिसङ्गीतसाहित्याभिनयानां कदम्बः' इति तूमाटि दोणप्प महोदयः अभिप्रैति।

In Public domain. Digitization Muthulakshmi Research Academy

देवर्षिः नारद एव प्रथमहरिकथाकारः इति भणितिः वरीवर्तते। सम्प्रदायमिमं ग्रन्थकृत् श्रीमान् अज्ञाड आदिभट्ल नारायणदासवर्यः तेलुगुप्रान्तयोः बह्वीः हरिकथाः विलिख्य प्रदर्शनपुरस्सरं विपुलप्रचारमकार्षीत्। अतस्तस्य बिरुदं हरिकथापितामहः इति वर्तते। साम्प्रतिकोऽयं ग्रन्थः संस्कृतभाषायां काचिद्धरिकथामृतझरी। यद्यपि परिमाणरीत्या लघुकृतिरियं तथापि प्रौढतायाम् उत्कृष्टतमा। हरिकथामृतमित्येनां कृतिं संस्कृतलोकाय परिचाययितुं पुनर्मुद्रणयोजनान्तर्गतत्वेन मुद्रयितुं च संस्कृतपरिषदः शैक्षिकसमित्या स्वीकृतेन निर्णयेन प्रयासोऽयम् आरब्धः।

इयं परियोजना राष्ट्रीयसंस्कृतसंस्थानमिति पूर्वनाम्नः केन्द्रीयसंस्कृत-विश्वविद्यालयस्य अनुदानेन प्रवर्तते। परियोजनायाः अस्याः आवाम् अनुसन्धाताराविति आत्मानं धन्यौ मन्यावहे। ईदृगवसरं दत्तवते परिषन्निदेशकाय आचार्याय नीलकण्ठवर्याय आदौ कार्तज्ञं विन्दावहे।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतये, कुलसचिवाय, परियोजनायाः अधिकारिभ्यः नमोवाकान् वितरावः। उस्मानियाविश्वविद्यालयस्य कुलपतये, कुलसचिवाय च आधमर्ण्यं प्रकटयावः। अमूल्यां कृतिमिमां परिचाययन्ती सम्पादनकर्मणि आत्मानं व्यापारितवत्यै वरलक्ष्मीवर्यायै कृतज्ञतां समर्पयावः। संस्कृतपरिषदः सहकारिसदस्येभ्यः धन्यवादान् विदध्वः।

इत्थं बुधजनविधेयौ परियोजनानुसन्धातारौ

सन्तोषसुब्रह्मण्यौ

षष्ट्यब्दग्रन्थमालापराख्या दुर्लभग्रन्थपुनर्मुद्रणपरियोजना

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

श्रीहरिकथामृतम्
प्रथमबिन्दुः
श्रीकृष्णजननम्

१. वन्दे संश्रितकल्पम् ।
सुन्दरगोपाङ्गनाहृदयतल्पम् ।
बृन्दावनसञ्चारम् ।
नन्दयशोदात्मजं दयापूरम् ॥

२. यस्त्रैलोक्यविभुर्यमाश्रयपदं ध्यायन्ति सर्वे बुधा
येनांहःपटली विनश्यति बलिर्यस्मै स्वराज्यं न्यदात् ।
यस्मान्नास्ति परं जगत्त्रयमिदं यस्योरुरङ्गस्थली
यस्मिन्भागवताश्चरन्ति स हरिर्मे काव्यमङ्गीक्रियात् ॥

भैरवीरागः - त्रिपुटतालः

उद्ग्राहः। प्रकृताभीष्टं देहि विभो श्रुतिसञ्चार ।
ध्रुवः। अकलङ्काकार पाहि प्रभो ।
मेलापकः। सकललोकाधार संश्रित - साधुजनमन्दारसद्गुण ।
निकर कुरु मे काव्यं सदा - निर्दुष्टं यशोविशिष्टम्
आभोगः। विकाररहित भक्तजनहृ - क्चकोरकमलाहितकाञ्चन ।
दुकूलसहितभवादिसुर - प्रकाण्डविहितकरुणामहित। ॥प्र॥
१पादः॥ घोरकलुषविदूरमुनिगेयकौस्तुभ - हारतनुजितमारसमुदाय।
क्रूरराक्षसभीषण संसारवार्निधिशोषण ग - म्भीरमधुरसुभाषणव
- न्दारुजनसन्तोषण।
आ ॥ शारदचन्द्रिकाहासव्रज - नारीचित्तोल्लासजगत् ।
पूरितसत्कीर्तिविकास - नारायणदासहृद्वास ॥ ॥प्र॥

In Public domain. Digitization Muthulakshmi Research Academy

३. सकलसुरनिकायवन्दनीयम् ।
प्रकटनिगमशास्त्रबृन्दगेयम् ।
अकलुषितसुधांशुकीर्तिभाजम् ।
सुकविनुतमवेमि विघ्नराजम् ॥

कल्याणी - आदिः

उ ॥ अघनाश विघ्नशोष - हंसेश नागभूष ।
ध्रु ॥ मघवादिस्तुत्यभाष - मणिभूषचारुवेष ॥ ॥अ॥
१पा ॥ हिमगिरितनयादिपुत्र - विमलाङ्गसच्चरित्र ।
दमितारे स्तोत्रपात्र - सुमन आढ्यसाधुमित्र ॥अ॥
२पा ॥ श्रितमोदतीर्थपाद - धृतचन्द्र दयासान्द्र ।
हतदैत्यबुधस्तुत्य - क्रतुरक्षदीनपक्ष ॥ ॥अ॥

४. वन्दे सारससन्निभाक्षियुगलां - वन्दारुमन्दारिकां ।
चन्द्रास्यां तनुकान्तिनिर्जितशर - ज्योत्स्नां विधातृप्रियाम् ।
इन्द्रादिप्रणुतां यशोविलसितां - भक्तार्तिसंहारिणीं ।
कुन्दस्मेरयुतां कवीश्वरमनो - वीथीलसत्सुन्दरीम् ॥

केदारगौडः - रूपकः

उ । अम्ब मामव प्रणत क - दम्बपोषिणि ।
ध्रु । अम्बुजभवप्रियकरनि - तम्बभूषिणि ।
मे । कम्बुनिभाञ्चितगले - खञ्जरीटदृग्युगले ।
बिम्बाधरे कचजितरो - लम्बच्छवे भवनिगले ॥
आभोगस्वरः॥ मम्मागरि सरिगरी - पप्पापमपनिधपा ।
सस्सानिधप निपरी - रिसानिधप धपामगरि ॥अं॥

In Public domain. Digitization Muthulakshmi Research Academy

१पा । शारदेन्दुमन्दहासे - सर्ववेदसमुल्लासे ।
नारायणदासमनो - नालीकनिवासे ।।जगदम्ब।।
आ । सरिमगरिरि तांतकिणत - मपनिसरि धणांतझणुत ।
निसरिगरिग धींतगधित - ससानिधप धिर्गुडु धिर्गुडु तदधिगिणत ।।

गद्यम् ।। अहो सकलवेदवेदाङ्गपुराणेतिहासकाव्यालङ्कारविचक्षणैः प्रकटवैदिक लौकिककार्यनिपुणैर्ब्राह्मणैर्विपुलसाहसौदार्यगाम्भीर्यशौर्यचातुर्यधुरन्धरैर्नरवरैः सकलवस्तुसम्पादनप्रयोजनव्यवहारधीयुग्भिर्वणिग्भिः सन्ततनवधान्यादि-सस्याभिवर्धनकरणभद्रैश्शूद्रैरनवरतपुरुषरक्षणैकायत्तचित्ताभिः कुलस्त्रीभिः सरससङ्गीतविमोहितरसिकस्वान्ताभिर्वाराङ्गनाभिः सङ्कल्पमात्रप्रत्यक्षीकृता-दृष्टलोकनिकरैः कवीश्वरैर्जीवन्मुक्तैर्भक्तैर्विराजितैषा सभा - निखिलभुवनरक्षण-निबर्हणधुरीणस्य सन्तताखिलदेवमुनिचिन्तितपादकमलस्य दुष्टनिग्रह-शिष्टपरिपालनचतुरस्य विलासार्थं भूमीगतस्य सर्वचराचरात्मकस्य देवकीगर्भशुक्तिमौक्तिकस्य व्रजवधूहृदयाब्जभम्भरायमाणस्य वेणुगानार्द्रीकृत-शिलातरुषण्डस्य परब्रह्मणो मुरारेश्चरित्रमेतस्यां विद्वत्संसदि कथयितुमद्य संसारबन्धनान्मन्दीकृतबुद्धिरहं साहसं करोमि।

५. यथा कुरूपीति विदन्नपि स्वयं विनोदयत्यल्पमतिः सदर्पणे ।
तथाहमज्ञोऽपि भवत्समक्ष मात्मानुमोदार्थमिदं ब्रवीमि ।।

खरहरप्रिया - मिश्रः

उ ।। द्रष्टव्याजनतातिक्लिष्टा ।।द्र।।
ध्रु ।। भ्रष्टा मोहनिवष्टा सततम - तुष्टा कालसं - दष्टा कष्टा ।।द्र।।
१ ।। धनिकोऽतिनिद्रो - दाता दरिद्रो ।
जनपो नीचरति - र्जाल्मोन्यायपतिः ।।द्र।।

In Public domain. Digitization Muthulakshmi Research Academy

२ ॥ निष्कन्ददातिचे - न्नीचोबहुमन्ता ।
शुष्कमङ्गीकरोति चेत् - क्षुद्रापि पण्डिताक्रान्ता ॥ ॥द्रा॥
३ ॥ देहोऽपिक्षणिक - स्तीव्रे रुजाधी ।
मोहोऽप्यत्यधिको - मोक्षःप्रतिरोधी ॥ ॥द्रा॥

६. राजाराज्यमुपेक्ष्य दुष्टसहितो - वाराङ्गनाः सेवते ।
मन्त्रीदम्भमपेक्ष्यकर्षकजना - द्राज्यस्वमाकर्षति ।
मूढानत्यबलान्निपीड्य - विभवानुद्योगिनस्तन्वते ।
किं वक्ष्ये कलिकालचेष्टितमिदं - केनापि नो वार्यते ॥

सावेरिः - एकतालः

उ ॥ भरतवर्षं किमिदं - परमर्षिप्रमददम् ।
ध्रु ॥ परराष्ट्रहृदयशल्यं - सुरराट्साम्राज्यतुल्यम् ॥भ॥
१ ॥ शरधिशिखरि परिवृतं - सदाचारसम्भृतम् ।
सरित्कासारविराजितं - समशीतोष्णभ्राजितम् ॥भ॥

७. प्राचीनं स्व - च्छन्दपालनाढ्यम् ।
श्रीस्थानं स - द्वर्ण योगिपूतम् ।
ब्रह्मारण्यं - भ्रष्टमेतदित्थम् ।
हा धिक्कष्टं - दैवदुर्विपाकम् ॥

८. वर्णास्सङ्कुलिताश्श्रियो विचलिता - वेदाःपरीभाविता ।
गावः क्रूरविभक्षिता ऋषिमतं - भूम्यां विनिक्षेपितम् ।
कन्याशुल्कमपेक्षितं द्विजगणे - नीताश्ववृत्तिस्सदा ।
धिग्धिधिग्भारतवर्षयोगमधुना - किं वर्णनीयम्मया ॥

In Public domain. Digitization Muthulakshmi Research Academy

भैरवी - त्रिपुटः

उ ॥ शृणुत सभाध्यक्षा विधि - गणितमवेद्यं सद्रक्षाः ॥ ॥शृ॥

ध्रु ॥ वृणुत सदोभयतारकं - फणीशशयकारकम् ॥ ॥शृ॥

आ ॥ नृणाबुद्बुदवदिहपूर्व - ऋणागतभोगभाव ।
गणस्संलक्ष्यते स्वस्मि - न्भणामि विबुधसेवयैव ॥ ॥शृ॥

१पा ॥ सततसत्यदयापरमसू - यति समस्तधरातलम् ।
विततकुत्सितलोकजम्बुक - वृत्तिकल्पितमविफलम् ॥ ॥शृ॥

आ ॥ सुतरां नितरां निबध्य - सूनृतमपसव्यमुखम् ।
प्रतनोत्यनृतं दुष्टो - रसनया कैतवोन्मुखम् ॥ ॥शृ॥

२पा ॥ पावनकुलीनोऽपि हीन - व्रातमनुसेवते धिक् ।
सेवारतिः स्वीयकु - क्षिम्भरित्वैकोपयुक् ।

आ ॥ श्वावदलङ्कृतचिह्नः - पराधीनसायाह्नः ।
भावितनश्वरविभवः - परिहीयते न किंससवः ॥ ॥शृ॥

९. सत्यं पातिव्रत्यं ।
नित्यं सकलैकमत्यकृत्यमपि ।
यत्र प्रभवति सौख्यम् ।
तत्रैव जनाः समाप्नुवन्ति भृशम् ॥

१०. भोभो मोक्षासक्ता ।
नः प्रभवति नार्हमिष्टमिह सौख्यम् ।
तस्मादीश्वरभजनम् ।
यथेच्छमस्माभिरद्य कर्तव्यम् ॥

काफी - त्र्यस्रः

उ ॥ मुहुरानन्दभरितम् - मुरलीधरचरितम् ।

ध्रु ॥ विहतसर्वदुरितम् - पिबत पिबत त्वरितम् । ॥मु॥

In Public domain. Digitization Muthulakshmi Research Academy

१ ॥ हरिनामवितान - मतिसौख्यनिधानम् ।
परमेश्वरगानं - भवमोक्षस्थानम् ॥ ॥मु॥
२ ॥ कृष्णकथासारं भव - तृष्णाघविदूरम् ।
तूष्णीङ्कृतवैरं श्रित - तोषणप्रचारम् ॥ ॥मु॥
३ ॥ वासुदेवगीतं स - र्वप्रपञ्चपूतम् ।
भासमाननारायण - दाससत्प्रणीतम् ॥ ॥मु॥

११. न श्रोत्रं विष्णुनाम - श्रवणविरहितं - किन्तु मृत्कुड्यरन्ध्रम् ।
नेत्रं नाम्भोजनाभग्रहणविफलितं - किन्तु काचोपमानम् ॥
वाग्नप्रद्युम्नसेवा - व्यतिकररचिता किन्तु काकोलघोषा ।
नाना श्रीकृष्णभक्ति - प्रतिकृतहृदयः - किन्तु तिर्यक्समानः ॥

झंझाटी - त्र्यस्रः

उ ॥ भजत भजत कृष्णपाद - पद्मश्रीसद्म ।
ध्रु ॥ त्यजत दुष्टकामिनी वि - हरणं मृतिकरणम् ॥ ॥भ॥
१ ॥ वहत वहत वासुदेव - भक्तिं श्रितमुक्तिम्।
विहतघोरधनाशा - पिशाचमतिनीचम् ॥ ॥भ॥
२ ॥ तनुत तनुत विष्णुल - न्मननं भवखननम् ।
चिनुत मोहजलाशय - च्छिद्रं बहुभद्रम् ॥ ॥भ॥
३ ॥ भणत भणत सदासत्य - वाक्यं प्रियैक्यम् ।
वृणुत नारायणदास - विहितं गुणमहितम् ॥ ॥भ॥

१२. भवायतिर्मरीचिकैव दृश्यते भ्रमात्मिका ।
कलेबरं जरारुजानिपीडितं विनश्यति ।
इति प्रतिक्षणं विचिन्त्य मोक्षदायकं हरिम् ।
सदा भजाम सन्त्यजाम सर्वदुष्टसङ्गमम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

१३. धनमतिबलनाशं - कुर्वते दुष्टनार्यो ।
मधुमुखविषकुम्भा - स्ता विदूरं त्यजाम ।
भवविदलनशक्तिं - तन्वते विष्णुभक्ता ।
विबुधनयनतोषां - स्तान्समक्षं भजाम ॥

१४. अतुलसुखदं राज्यैश्वर्यं - धुनोति तृणं यथा ।
नवनववयोयुक्तं देहं - प्रपश्यति काचवत् ।
सततनृहरिव्यस्तात्मा यो - नरस्सुकृती खलु ।
प्रविमलगुणः प्रह्लादोव - प्रकुण्ठितसंसृतिः ॥

१५. अहो प्रह्लादनाम्नैव - हन्यन्ते पापकुञ्जराः ।
प्रत्यक्षान्नरसिंहस्य तस्य भक्तस्य सन्निधौ ॥

१६. इहपरसौख्यद्वारम् ।
प्रत्यहमन्योऽन्यविहितसञ्चारम् ।
साधूनां परिवारम् ।
सेवेऽहं सत्यवाक्सुधापूरम् ॥

शुभपन्थवरालिः - चतुरश्रः

उ ॥ अनुसरमानस भागवतमत - मनवरतं सत्यदयाभरितम् ॥
ध्रु ॥ तनुसमभावं सर्वभूतेषु - तामसं त्यज सदा हरिं भज ॥ ॥अ॥
आ ॥ चिनु चिनु मोहाशय - च्छिद्रं बहुभद्रम् ।
सुनु सुन्वात्मानं कृष्णभक्ति - सुधासेचनैर्भवमोचनैः ॥ ॥अ॥
१ पा ॥ दीनाय वित्तं सन्देहि - गानलोलभक्तमवेहि ।
ध्यानाकर्णनकथनोल्लास - स्त्वरया भव नारायणदास ॥ ॥अ॥
आ ॥ ज्ञानिनो नावमंस्थाः - सन्ततं परमुपचर स्वस्थः ।
हीनमनोरथान्माकृथा - श्श्रीनाथान्यं मा ब्रूथाः ॥

In Public domain. Digitization Muthulakshmi Research Academy

१७. ईश्वरभक्त्या पूतम् ।
मधुनवसंङ्गीतपद्यसमुपेतम् ।
रञ्जितजनसङ्घातम् ।
भवभयसन्तरणवृत्तमनुभूतम् ॥

वसन्तः - चतुरश्रः

उ ॥ ज्ञानलवदुर्विदग्ध रे - मानुष स्वीकृतपातकस्निग्ध ॥
ध्रु ॥ मानावमानसन्दिग्ध - माधवं भज रे जगदीशं मुग्ध ॥ ॥ज्ञा॥
१ ॥ न विश्वसिहीन्द्रजालं स - त्यविरुद्धक्षणिकवस्तुमूलम् ।
पवित्रं विष्णुनाम गृहाण - प्रविमलं स्वीयजन्मपुषाण ॥ ॥ज्ञा॥
२ ॥ क्रूरमार्गान् जहीहि स - त्पौरुषेण दीनमहितमपि पाहि ।
नारीविमोहं मा कृथा - नारायणान्यं मा शिश्रियथाः ॥ ॥ज्ञा॥

१८. रे मानुषत्वमतिनीचः सदासिकृत - भोगोऽपि दुष्टवशतो ।
यज्ञानसाहसकृताघान्नितान्तमनु - भुक्तं त्वया प्रतिफलम् ।
दुस्तन्त्रकैतवनृशंसप्रधानतव - किञ्चापि नास्ति सुकृतम् ।
कुक्षिम्भरिस्त्वमिह नष्टोऽसि मोहपर - नारायणं स्मर भृशम् ॥

१९. मानयेथा वृथाकालमस्थिरेऽवशजीविते ।
स्मर नारायणम्मूढ शाश्वतानन्दमाप्स्यसि ॥

कमाच् - चतुरश्रः

उ ॥ श्रूयतां नारायणचरितम् ।
ध्रु ॥ पीयतां हरिनामामृतम् ॥ ॥श्रू॥
आ ॥ धीयुतः पुरा परिक्षिन्नरप - तिर्जीवन्मुक्तं शुकयोगिनम् ।
मेयम्मुनिगेयमित्थमभण - द्मे दास्यं देहमुनिवरेति ॥ ॥श्रू॥

In Public domain. Digitization Muthulakshmi Research Academy

१ ॥ दष्टोऽहम्मुनिशापवशा - द्भ्रष्टोऽहम्मद्राज्यनिवेशात् ।
शिष्टविचारविनष्टसंसार - कष्टोऽहम्भवमोहनलेसंजुष्टोऽहम्। ॥श्रू॥
आ ॥ तुष्टिं न प्राप्नोमि कल्मषवि - दूरात्यार्तं तव करुणा ।
दृष्टिं प्रसार्य सन्तोषय मां - हृषीकेशचरितेनाद्येति ॥ ॥श्रू॥

२०. त्यक्तुं राज्यमशेषनाकपदवी - तुल्यं बुधैः पालितम् ।
विस्मर्तुं नवयौवनाञ्छितसुतं - सौजन्यवाग्भूषितम् ।
सोढुं भूरिवियोगतापमधुना - देव्या मुहुर्बाष्पदम् ।
देवस्तुत्यतपोविराजित कथं - शक्नोमि मां बोधय ॥

२१. अभिनवयौवनपल्लव ।
मधुना वैशाखविस्तृतारामम् ।
दाहयसि किमुत तक्षक ।
देहं सुतदारबद्धसम्मोहम् ॥

२२. सङ्गतं - सततजीवनमुक्तवशङ्गतम् ।
लालनं - स्वजनचित्तमनोहरखेलनम् ।
मल्लिकां - शिशिरमन्मथबाणमतल्लिकाम् ।
संस्मरन् - हृदयपान्थशुचं बिभृषे कथम् ॥

झंझाटी - त्र्यस्त्रः

उ ॥ तारय मां शुकऋषे सं - सारसागरतः ।
ध्रु ॥ पूर यमदभीष्टं परि - पूरितादरतः । ॥ता॥
१पा ॥ किं भविष्यति देह ईदृश - शोकसम्प्लवः ।
किं भवेद्विषघोरतक्षक - दंशनोत्सवः ॥
२पा ॥ किं विमोहमीदृशमि - तःपरं त्यजेत् ।
किं वैराग्यपावकेत - नुत्रयं यजेत् ॥ ॥ता॥

In Public domain. Digitization Muthulakshmi Research Academy

२३. इत्यक्षिकोणपरिपूर्ण शुगश्रुजालम् ।
सौभद्रसूनुमघहीनमुवाच मौनिः ।
तद्वाक्यतत्वविमलामृतगानबद्ध ।
श्चित्रीकृतोवपशुपक्षिगणो बभूव ॥

केदारः - त्रिपुटः

उ ॥ शृणु नराधिप भक्तितत्पर - सुलभमोक्षणं वृणु ।
ध्रु ॥ भणति किं मादृशस्तव - भाग्यवैभवम् । ॥शृ॥
आ ॥ नृणां यःकोऽपि नारा - यणस्य चारित्रं भक्त्या ।
शृणोति संसृतिं दूरयन् - भणामि स तरत्यनुरक्त्या । ॥शृ॥
१ पा ॥ जानीह्यनिशं जगदिदं - जाग्रत्स्वप्नकृतम् ।
ज्ञानी ह्यात्मनः परं न वि - जानीयात्सततम् ।
आ ॥ मानवनाथ रहस्यमिदं - मतं गतं मा शोचीः ।
ध्यानं कुरु जगदीशं - प्राश्नास्यमृतगुडूचीः । ॥शृ॥
१पा ॥ दृश्यते पुरा यत्तन्नश्यति कथम् ।
पश्य योगी त्यजति निरय - भ्रममीदृग्विधम् ।
आ ॥ काश्यप्यां यो नरो वि - ज्ञातृसङ्गतिं नेहतेऽ ।
वश्यमसौ जनन मरण - भ्रान्त्या किमपिदुरूहते । ॥शृ॥

२४. स्थूलां सूक्ष्मां गतिं सर्वं वस्त्वाप्नोत्यनिशं द्विधा ।
महदिन्द्रियसन्दृष्टमणुरूह्यस्तपस्विभिः ॥

२५. देहप्रकृतिमाश्रित्य व्यक्ताव्यक्तविभेदतः ।
चेतनास्तीति यो वेत्ति तस्य मृत्युभ्रमो न हि ॥

२६. सामीप्यं स्याद्दूरमेव मार्गाणां गतिभेदतः ।
बन्धो भवेन्मोक्ष एव - नराणां मतिभेदतः ॥

In Public domain. Digitization Muthulakshmi Research Academy

२७. इत्युक्तवन्तं मुनिपुङ्गवं तं ।
पप्रच्छ राजा शमिताश्रुपूरः ।
प्रभो मुने त्वां शरणं प्रपद्ये ।
वैराग्यमार्गं नय मां दयालो ॥

२८. कालस्सन्निहितो मतिर्विचलिता - तक्षागमस्सूचितो ।
दारापत्यगतं मनागपि मनो - नाद्यापि सन्धुक्षते ।
यत्तत्वं कथितं त्वया बत परि - व्राडेकवेद्यं मुने ।
सूक्ष्मद्वारमनूनवस्त्विव मम - श्रोत्रं न तद्गच्छति ॥

धनश्रीः - त्र्यस्रः

उ ॥ भ्रान्तिः कीदृशीवि - भ्रान्तिः कीदृशी ।
ध्रु ॥ श्रान्तशोकदा - ध्वान्तभवपदा । ॥भ्रा॥
१पा ॥ मधुरमधुरप्रियादृ - गधरखेलनम् ।
क्षुधानिद्रास्वप्नसु - षुप्तिलालनम् ॥ ॥भ्रा॥
२पा ॥ हासह्रीक्रोधविमो - हाशाकारणम् ।
त्रासाधिव्याधिवय - स्तत्वचारणम् ॥ ॥भ्रा॥

२९. व्यथयति मां भवपाश ।
स्तक्षकविषवह्निदग्धतनुकोशः ।
मृगतृष्णासङ्काशो ।
भक्तिलवित्रेण तं छिनद्धि कथम् ॥

३०. कथमेतत्सकलं चराचरमभू - त्केनापि दुर्बोधितम् ।
कथमात्मा प्रतिबध्यते खमिवनि - र्लिप्तोऽप्यसौ मायया ।
तनुकोशो विनिभिद्यते यदि परं - किं स्यादविद्यान्यतः ।
करुणासान्द्रमुनीन्द्रमच्छ्रुतिपुटे - तत्वामृतं पायय ॥

In Public domain. Digitization Muthulakshmi Research Academy

३१. तदा शुकपरिव्राजा राजा सन्दिग्धमानसः ।
सूक्ष्ममार्गेण सम्बुद्धो येन तीर्णा मुमुक्षवः ।।

ग ।। पापाट वीवीतिहोत्र - पुण्यचारित्र - सुकुमारगात्र - समस्तपरिपन्थिजैत्र - सज्ञनवनचैत्र - सम्प्राप्तविबुधस्तोत्र - कलिकल्मषान्धकारप्रचण्डमित्र - शोकाब्धिनिर्मग्नदीनवहित्र - याचकदारिद्र्यलतालवित्र - पाण्डवकुलपवित्र - सावधानं शृणु राजन् परिदृश्यमानसर्वप्रपञ्चव्यतिरिक्त आत्मास्ति - तस्य सङ्कल्पविकल्पौ द्वौ स्वभावौ स्तः - सृजत्यात्मा सङ्कल्पवशादेतच्चराचरं यथोर्णनाभिस्तन्तून्वितनोति - स भूयः सकलमात्मनि जले बुद्बुदवद्विकल्पे विलाययत्यात्मनः परमपश्यन्निदमित्थमद्वैततत्वं मुनीनामपि दुरूहं - तथाहं मोक्षस्य सुलभमार्गं ते दर्शयामि।।

३२. विस्रब्धो भव सर्वशक्तिनिभृतः - सर्वेश्वरोऽस्तीति तम् ।
जानीह्यात्मनि सर्वतः परमजं - सत्यं विराट्पूरुषम् ।
तस्मिन्लीयत एव सर्वमिति ये - ज्ञात्वास्तिकास्सर्वदा ।
तस्याङ्घ्रिद्वयचिन्तनापरवशा - स्ते यान्ति निश्रेयसम् ।।

३३. तस्मात्प्रज्ञानवैराग्यभक्तितत्वान्यवाप्नुहि ।
तेषु श्रेष्ठां विदुर्भक्तिं मुनयः पारमेश्वरीम् ।।

काम्भोजी - रूपकः

उ ।। परमेश्वरभक्तिं व्रज - भागवतमतङ्गज ।
ध्रु ।। गुरुसंसृतिमोहं त्यज - कोविदमैत्रीं भज । ।।प।।
१पा ।। मानसदार्ढ्यं विधेहि - मरणान्न बिभीहि ।
दीनं शत्रुमपि पाहि - तृष्णां विजहीहि । ।।प।।
२पा ।। सारं वेदेभ्यः सुनु - सत्यं प्रतनु ।
नारायणदासं शृणु - नाकैश्वर्यं पृणु । ।।प।।

In Public domain. Digitization Muthulakshmi Research Academy

३४. नश्यामीति नरेन्द्र किञ्चिदपि मा - भैषीरलङ्घ्या मृतिः ।
पश्यैतत्सकलं विनश्यति यतो - जातं स्वभावात्ततः ।
तस्मादुत्तरभूरिसंसृतिपयो - राशिं महादुःखदम् ।
गोविन्दाङ्घ्रिसरोजभक्तितरणी - मारुह्य सद्यो मुदा ।।

३५. स्याद्राज्यं स्वर्गतुल्यं - विरहितसकल - ज्ञातिवैरं सुधर्म्यम् ।
कान्ता साध्वी प्रशान्ता - निरतनववयोरूपरम्या लभेत ।
आरोग्यं सुन्दरत्वं - विपुलभुजबलं - वेदशास्त्रप्रथा स्युः ।
सर्वाण्येतानि सौख्यं - न हि ददति सदा भक्तिवन्माधवस्य ।।

बिलहरिः - त्र्यस्रः

उ ।। मुरहरिं विहाय भजति - मुमुक्षुरन्यं कथम् ।
ध्रु ।। स्वरमणं प्रभूयसती - प्रकुरुतेऽन्यमनोरथम् । ।।मु।।
१पा ।। स्वेच्छामपमायबुध - श्श्ववृत्तिमिच्छति कथम् ।
तुच्छोक्तिमवायगुणी - दूषयति किमवितथम् । ।।मु।।
२ पा ।। क्रूरं सन्त्राय हन्ति - कोविदो हितं कथम् ।
सारं न विनीय सुधीः - सङ्गच्छति दुष्पथम् । ।।मु।।

३६. यत्कृतं - जननचालनशीत्कृतम् ।
यद्धृतं - नखमुखेन नगोद्धतम् ।
यन्नतं - परमयोगिहृदुन्नतम् ।
स्मारितं - भवतु तन्निगमेरितम् ।।

३७. भक्तिप्राशस्त्यमित्थं वदन्तं शुकयोगिनम् ।
सन्तुष्यार्जुननप्ताह सम्भृताह्लादमानसः ।।

In Public domain. Digitization Muthulakshmi Research Academy

सिंहेन्द्रमध्यः - त्र्यस्रः

उ ॥ मुरहरचरितं श्रवण - पुटे मम पूरय ।

ध्रु ॥ मरणभयाम्भोनिधिनि - र्मग्नं मां तारय ।

मे ॥ स्फुरन्मेरुधैर्य - शुकऋषिवर्य ।

सरसवचोधुर्य सदा - सदवधूतचर्य । ॥मु॥

१पा ॥ व्रजकुलं कथमजीजनद - भवं विराट्पूरुषम् ।

त्यजति वपुस्स सामा - न्यवद्विगतपौरुषम् । ॥मु॥

२पा ॥ स्खलनविरहितः कथं - जार इति विश्रुतः ।

कलुषविदूरात्मन्मां - कथय तत्सत्यतः ॥ ॥स्फु॥

३८. कथकमणिश्शुकयोगी ।

कथितं गोविन्दचेष्टितैः प्रथितम् ।

अहमपि हरिभागवतः ।

स्वस्त्यस्मै मधुरमधुरसमयाय ॥

३९. यस्य स्मरणं - भवभयहरणम् ।

यस्य चरित्रं - सज्जनमित्रम् ।

यं भयकम्पा - यान्ति निलिम्पा ।

ब्रूहि मुने तं - कायजतातम् ॥

४०. इति प्रार्थयन्तं - लसद्भक्तिमन्तम् ।

दयासत्यसान्द्रं - परिक्षिन्नरेन्द्रम् ।

अवोचन्मुनीशः - पुनर्जन्मनाशः ।

सुकर्पूरमोचा - फलस्वादुवाचा ॥

४१. आनन्दबाष्पपूरं ।

चलयति नेत्रेऽप्रतिहतसञ्चारम् ।

गात्रे मे रोमाञ्चम् ।

तनोत्यहो तावकीनसम्प्रश्नः ॥

In Public domain. Digitization Muthulakshmi Research Academy

४२. वक्ता श्रोतापि कृतिनौ कथया भवतो हरेः ।
तत् कृष्णचरितं वच्मि पितरं मे स्मरन्नृप ॥

४३. निर्मथितनिगमसिन्धुम् ।
भवतिमिरनिमग्नजनजगद्बन्धुम् ।
वन्दे वेदव्यासम् ।
निखिलपुराणेतिहासनिश्वासम् ॥

४४. अष्टादशपुराणानि प्रोक्तानि गुरुणा मम ।
तेषु भागवतं श्रेष्ठं कृष्णलीलाविभूषितम् ॥

४५. शास्त्रं गभीरं प्रमदं कवित्वम् ।
लोको हि सूक्ष्मो मतिरत्यनल्पा ।
काव्यं कथं तुष्टिमुपैति ताव ।
द्गोविन्दलीलाकथनं न यावत् ॥

श्रीः - चतुरश्रः

उ ॥ भागवतं शृणु - भक्त्यनुराग - नागपुरीसं - स्थानविभाग ।
ध्रु ॥ श्रीगामिन् श्रित - सेवनोद्योग - सागः प्लुतदै - त्यप्रतियोग ।
आ ॥ योगिपूजितं - युक्तियोजितं - भोगिराजितं - बुधभ्राजितम् ।
स्व ॥ रिमरिप मनिपस - निगरिनि सरिनिप - मनिपम रिगरिनि ।
सरिमरीम-रि मपमाप- मपनिपानि- पनिसनीस- गरि ॥भा॥

१पा ॥ कलिमदसंहार - कलुषविदूर - जलजेष्वाकार - साधुविचार ।

आ ॥ ललितिं सर्वत्र नवरसो - ज्ज्वलितं - सकलागमार्थसङ्कुलितं पाठकजनजन्मफलितम् ।
रिमारिपमनी - पसापनिपरी - सगारिसनिपा - निरीसनिपमा ।
पसानिपमरी - गरीसनिप - रिसानिपम - रिसगरि पमनिप ।
तकिट दधिगिणत-मरिगरिसनि-तकदधिगिणत-पनिरिस-तदधिगिणत।

In Public domain. Digitization Muthulakshmi Research Academy

४६. पुराणं श्रीभागवतं द्वादशस्कन्धभूषितम् ।
दशमे तत्र सम्भूतं कृष्णस्य चरितामृतम् ।।

४७. शाश्वतोऽहमिति ज्ञानं संश्रिताय ददाति यः ।
तं विराट्पूरुषं देवाः कंसभीताः पुरास्तुवन् ।।

४८. वन्दामहे सकलशक्तिमजम्महेशम् ।
वन्दारुबृन्दघनकल्मषगर्वनाशम् ।
इन्द्वर्कबिम्बितनिजाद्भुतचित्प्रकाशम् ।
सुन्दोपसुन्दमुखदानवकण्ठपाशम् ।।

मुखारिः - आदिः

उ ।। प्रत्यक्षं भव- भवभयनाश - दित्यभयादव - त्रिजगदधीश ।
ध्रु ।। स्तुत्यविहारवि - शुद्धाकार - सत्याधार - साधुविचार । ।।प्र।।
१पा ।। दीनार्तिं हर - स्थिरदयाशालिन् - मानुषेषु सम्भववनमालिन् ।
श्रीनाथविना - शितभववेध - ज्ञानस्वरूप - शार्ङ्गचाप । ।।प्र।।
२पा ।। क्रूरनृपतिभिः - क्षोण्याक्रान्ता - भारमिलाया अ-पहर माकान्त ।
सूरिजनस्तुत - सुगुणविशाल - नारायणदा - सावनलोल । ।।प्र।।

४९. पाहि प्रसन्नरू-पदयाकलापस-त्यालापसर्वलो-कैकदीप ।
विज्ञानकन्द गो-विन्द मुकुन्द नि-त्यानन्द सुस्मिता-स्यारविन्द ।
पद्माविलोलता-पत्रयोन्मूलस-त्कीर्तिविशालस-दार्तपाल ।
भवपातकत्रास-वैकुण्ठवास स-ञ्चितवेदनिश्वास-चिद्विलास ।।

जलधरश्यामदेवता - सार्वभौम । भव्यनुतिपात्र पतितपावनचरित्र ।
भक्तमन्दारकैवल्य - पदविहार । हे जगन्नाथ संश्रित - हृद्विबोध ।।

५०. यद्वस्तुतत्वं सुधियोऽप्यवेद्यम् ।
यत्तन्तुभावो जगतः पटस्य ।

In Public domain. Digitization Muthulakshmi Research Academy

यद्भङ्गवत्कारयते स्वमायाम् ।
तन्नः प्रसन्नं भवतीशरूपम् ॥

ग ॥ तदा ध्यानसमाधिवशादपगतान्तर्बाह्यप्रपञ्चवृत्ती - न्त्रिटल तटघटितकरकमलपुटा - नर्धोन्मीलितवीक्षणसरःप्रसारितानन्दाश्रुझरीपरिषिञ्चितकपोलपालीन् - जानुप्रकुञ्चिताङ्गपरिस्फोटितरोमाञ्चान् - कंसादिदुष्टराक्षससञ्चकितगोदीन-तापसार्तिविदलनसंसक्तान् - निरुद्धोच्छ्वासनिश्वासान् - चित्रार्पितानिव निश्चलान् - स्वभक्तान् - पाकशासनप्रमुखनिखिलामराननुग्रहीतुं - सकलभुवननिर्माणरक्षणनिबर्हणधुरीणः - संश्रितपारीणः - सन्ततविनत-रुद्रद्रुहिणेन्द्राद्यखिलगीर्वाणः - पुत्रीकृतपञ्चबाणः - श्रीमन्नारायणः - स्वीयोत्तमाङ्गप्रदीपितकोटीरेणत्रिभुवनैश्वर्यं - वक्षोविभूषितकौस्तुभेन सकलचराचरात्मकत्वं - बाहुशाखाञ्चितचक्रशार्ङ्गगदाद्यायुधनिचयेन जगच्छासकत्वं प्रकटयन् - प्रह्लादनारदादिभागवतैस्संस्तूयमान - स्ताक्ष्यरथमारुह्य - प्रत्यक्षं भूत्वा - देवानित्थमब्रवीत् ॥

५१. लीलामानुषविग्रहेण धरणी - मागत्य दुष्टासुरान् ।
सद्यः सम्प्रहराणि गोमुनिगणा - न्पातुं भवानि व्रजे ।
भूभारं सकलं वहानि निरतं - जीवानि भक्तैस्सहा ।
हं यूयं तदितःपरं क्रतुहवि - र्भागं सुखं जक्षित ॥

५२. यद्यवकाशः प्राप्तः ।
प्रभवत्यम्भोनिगूढमाकाशात् ।
अहमपि सर्वव्यापी ।
तथास्मि नैजाच्छ्रितेप्सितं कर्तुम् ॥

५३. इत्युक्तवन्तः परमेश्वरेण ।
देवास्तदा जग्मुरभीष्टलोकम् ।
इति ब्रुवाणं शुकयोगिनं तम् ।
जगाद भूपः कुरुवंशदीपः ॥

In Public domain. Digitization Muthulakshmi Research Academy

५४. कस्तेपे चिरकालदुस्तरतपः - कर्तुं हरिं स्वात्मजम् ।
का बिभ्रे परिपूर्णमद्वयमजं - गर्भे जगत्कारणम् ।
का रेमे त्रिगुणातिरिक्तविभुना - कामातुरा ब्रह्मणा ।
किं चक्रे मृतिमव्ययस्य भगव - न्मामज्ञमुद्बोधय ॥

ग ॥ तदा व्यपगताखिलरोगी - सर्वसङ्गत्यागी - विनमितसकलविरागी - मोक्षतत्वामृतभोगी - शुकयोगी - क्रूरापाण्डवात्संरक्षितं - कुपिताविवेकमुनिना विशिक्षितं - दुष्टाहङ्कारेणाक्षतं - मोक्षमार्गे विलक्षितं - परीक्षितं प्रत्यभाषत - साधु भो सुगुणविशाल - दीनजनावनलोल - करुणालवाल - सञ्चकितपापजाल - शात्रवाम्बुदप्रचण्डवातूल - मुक्तिकान्तानुकूल - चारुशील - कुरुभूपाल सावधानं शृणु राजन् - रथाङ्गसारसहंसमधुपप्रलुब्ध परिमलमिलितोत्फुल्लपद्मकैरवप्रसन्नमधुरजलाञ्चत्कासारविराजिता - जिताशेष-नन्दनप्रसूनफलसम्भरितविविधवृक्षलतोद्यानविभासुरा - सुरेश्वरानन्दकरै रावणोच्चैश्रवो दर्पातिशय मनोहर चरन्मदद्विपाश्वपदसमुद्भूत धूलिधूसरित-दशदिशावकाशा - काशाभाश्मविनिर्मितघनाघनमण्डलाभ्रंलिहादभ्रविभ्रम-कृत्सौधगवाक्षनिर्गतधूमपटलाम्बुदविलोकनकुतूहलनृत्यन्मयूरसमुदया - दयासत्यशौचशुभगुणास्पदविहिताचारनुवर्तन परब्रह्मक्षत्रवैश्यशूद्रपञ्च-जनविभासिता - सिताचल इव शङ्करसतीपदचिह्नप्रपूता - पूतक्रतुधनुरिव विविधवर्णा - मधुरा मधुरा पुरा राजते स्म संश्रितकल्पवल्ली - नगरीमतल्ली।

५५. तस्यां यादवपुङ्गवः पतिरभू - न्नाकाधिपप्राभवः ।
स्वेच्छां प्राप्य सदाशिषत्सुरनुत - श्रीरुग्रसेनप्रभुः ।
सोऽक्षोभीद्रिपुसैन्यमाश्रितजना - नैक्षिष्ट दाक्षिण्यतः ।
प्रातार्प्सीत्पितृदेवसङ्घमलिव - ल्लोके यशश्चन्द्रिकाम् ॥

५६. तस्याजनिष्ट कंसाख्यो दुर्जय्यो लोककण्टकः ।
पुत्रः पुत्रीलसद्वृत्ता सुरूपाजनि देवकी ॥

In Public domain. Digitization Muthulakshmi Research Academy

सुरटः - त्रिपुटः

उ ॥ सा देवकी सुगुणा हरि - जननपूरणा ।
ध्रु ॥ भूदेवतासहनयुता - पूतचरिता । ॥सा॥
१पा ॥ आताम्रपङ्कजपदयुग - ला तरुणी ।
शीतांशुमुखी कम्बुगला - चित्तजकरिणी । ॥सा॥
२पा ॥ स्मितविजितचन्द्रिकारदनह - सितमल्लिका ।
ततचिकुरषट्पदा है - मतनुवल्लिका । ॥सा॥
३पा ॥ दरपङ्केरुहनयना च - ञ्चरीकचिकुरा ।
गिरिपयोधरा कपोला - धरितमुकुरा । ॥सा॥

५७. सा बाला परमेशभक्तिनिरता - जागर्ति पद्मैस्सह ।
स्नात्यभ्यर्चति दैवतानि सुपति - प्राप्तिं चिरं ध्यायति ।
सत्यं वक्ति हितं सदा स्मितमुखी - पात्यन्नपानातुरान् ।
दाक्षिण्यं वहते स्वबन्धुषु भृशं - मातापितॄन्सेवते ॥

नवरोजुः - चतुरश्रः

उ ॥ पतिव्रता यं - भजति स एव - पतिसंज्ञः कुरुदीप ।
ध्रु ॥ सती यत्र निव - सति तद्भवनं - स्वर्गसमं भूमीप ।
मे ॥ श्रुतिविहितमिदं - शृणु परमार्थं - सुश्रुतकीर्तिकलाप ।
सततारिचमू - सन्तापश्रित - शार्ङ्चापगतपाप । ॥प॥
१पा ॥ अनुकूला य - स्य गृहिणी स ए - वाभिनवपञ्चबाणः ।
तनुते यस्सत्यां ब्रह्मकुलां - स एव विहितपुराणः । ॥प॥
२पा ॥ लभ्यते येन रमणीपूता - लक्ष्मीविभुस्स एव ।
बिभ्यति यमोऽपि भृशं साध्व्या- भिदुरायुधाद्रिरीव । ॥प॥

In Public domain. Digitization Muthulakshmi Research Academy

५८. स्वच्छन्दराज्यं रतिराजरूपम् ।
सद्वर्णजन्मा तत बाहुशक्तिः ।
विद्यायशोदा न भवन्ति नूनम् ।
मोदाय पुंसः कुलटाधिपस्य ॥

मञ्जारी - धनश्री - चतुरश्रः

१पा ॥ कृता प्राणेश्वरी सा देव - की वसुदेवाख्यस्य ।
सततविष्णुभक्तस्य सन्नुत - क्षत्रियेषु मुख्यस्य ।
२पा ॥ सूनशराकारस्य धीरस्य - शूरसेनवीरस्य ।
दीनजनाधारस्य दिग्व्यापि - दिव्यकीर्तिपूरस्य ।
३पा ॥ सत्यवाग्धुरीणस्य समधीत - सकलागमबृन्दस्य ।
नित्यदानपरितुष्ट विबुधस्य - निखिलसुगुणकन्दस्य ।

५९. अथ कंसो महावीरो वसुदेवं स देवकी ।
स्वगृहेऽभ्यर्चितुं वाञ्छन् रथसारथ्यमातनोत् ॥

ग ॥ ततस्ते नूतनविवाहमहोत्सवकथ - नानुलापकुतूहलायत्तचित्ताः कियद्दूरं गत्वा - दुर्निरीक्ष्यमाणमध्यन्दिनमार्ताण्डप्रचण्डकिरणप्रशोषितान् - विपुलवेग सञ्जनिताधिकस्वेदपरिषिक्तसर्वावयवान् - दीर्घायासविवृतमुखोज्झित फेनकणप्रकीर्णरथमार्गान् रथ्यानुपसान्त्वयितुं - दशदिग्व्यापिदवधूमभयङ्करे - वसन्तप्रमुदितनानाविधवृक्षलतानिकुञ्जमनोहरपल्लवाङ्कुरे - प्रसूनमरन्दास्वादन सम्भ्रमभ्रमन्मदभ्रमरच्छायापङ्क्तिले - विश्रान्तसकलवन्यसङ्कुले - सन्तप्तमहिषतण्डावगाहनपङ्कीभूतहृदे - विस्तृतभूजालवालरोमन्थक्रिया- लोलचतुष्पदे - विपुलाद्भुतानन्दभवने - कस्मिंश्चिद्वने - कंसदेवकीवसुदेवाः - परस्परातिशयसुहृद्भावा - नव्यदुकूलालङ्कृताः - प्रथिततृषावशङ्कृताः - समुन्नतगिरिगह्वरनिपातनरवबधिरीकृताशाभागा - मत्युद्धतवेगा -

In Public domain. Digitization Muthulakshmi Research Academy

मल्पशिलासङ्गरङ्गत्तरङ्गसङ्गीतविमोहितभोगिभोगपरिवेष्टितकेतकीपूगवकुल कदम्बां - विनिर्मलजलाशयोत्प्लुतशफरीकबलनोत्सुकाकाशविलोलत्क विप्रतिबिम्बां - सुन्दरदरीं - पर्वतझरीं दृष्ट्वा - सलिलपानानन्तरमश्वान्फल-विनम्रसहकारशाखासु बद्ध्वा - शीतलवाश्शीकरमिलत्सूनपरिमलवहन्मलय-मारुतमनुभवन्तः - शुकपिकदाम्पत्यसल्लापान् शृण्वन्तो विश्रान्ता बभूवु - स्तदा स्वसृप्रियं वदन्तं कंसमुक्तमित्थमशरीरवाण्या।

६०. रे रे मूढमनस्क कंस किमति - प्रेम्णा स्वसारं वृथा ।
सन्मान्यां कुरुषे त्वया न विदितं - तस्याः कनिष्ठस्सुतो ।
लीलामानुषविग्रहस्समददै - त्येन्द्राद्रिवज्रायुधो ।
दुष्टं त्वां प्रहणिष्यति व्रजपदे - संवत्स्यति श्रीपतिः ।।

मञ्जरी - आनन्दभैरवी - चतुरश्रः

१पा ।। इत्याकर्ण्य कठोरं वाक्यं - सत्यं भीतः कंसः ।
घात्या देवकीति मत्वा ख - ड्गं जग्राह नृशंसः ।
२पा ।। तदा जीवेश्वरीं सुगुणाढ्यां - त्रातुं कम्पितगात्राम् ।
मदव्याघ्रसङ्गस्तमृगीमिव - महाभयाकुलनेत्राम् ।
३पा ।। कंसदेवकीमध्यमागत्य - करुणरसात्यनुकूलम् ।
शंसा पूर्वमसौ वसुदेवः - समारभत वाग्जालम् ।

यदुकुलकाम्बोजी - रूपकः

उ ।। मा जहि स्वसारं - मज्जीवाधारम् ।
ध्रु ।। भोजकुलवतंस - भूतदयोत्तंस कंस । ।।मा।।
१पा ।। किं विश्वसनीयं शून्यं - कितवभ्रमजन्यम् ।
त्वं वृथा न बिभीहि मे - दारान्विजहीहि । ।।मा।।

In Public domain. Digitization Muthulakshmi Research Academy

२पा ।। त्रिजगद्वीरस्त्वमसि - स्त्रीं हन्तुं नार्हसि ।
त्यज दयालो कोप - मखिलबन्धुतापम् । ।।मा।।

६१. तवाप्येकानुजां बालां त्वय्यपि प्रेमविह्वलाम् ।
त्वदधीनं करिष्यामि सन्तानम्मेऽव मत्प्रियाम् ।।

६२. न सा भवतु शून्यवाक् - तव मेव सन्तापयु ।
ग्विमुञ्च बत सोदरीं - भयविलोलशातोदरीम् ।
भवादृशविपश्चितः - खलु दरोऽद्य नानिश्चितः ।
प्रसीद हितभावुकं - प्रकटमस्तु ते भावुकम् ।।

६३. बहुकरुणारसभरितम् ।
श्रुत्वा कंसोऽथ भावुकस्य गिरम् ।
दययार्द्रीकृतहृदयः ।
कोशे विनिवेश्य खड्गमभणत्तौ ।।

६४. क्षमेथां मामज्ञं - प्रकटदुरहङ्कारपिहितम् ।
न जाने मूढोऽहं - न हि मनुजमात्रस्स्पृशति माम् ।
हरिः क्वास्यास्सूतिः - क्व बत विपरीता गगनगी ।
रलंकुर्वीयाथां - रथवरममुं पुण्यमिथुन ।।

ग ।। इति ह्रियावनतमुखं - स्वपुरीगमनोन्मुखं - कंसं निखिलधराधिपावतंसं - विनयविवेकाभ्यां प्रार्थयन्तं - पृथु दयावन्तं - देवकीवसुदेवौ कष्टतरसं-लब्धजीवौ विपुलाह्लादभावौ - सादरामोदेन मिथःपश्यन्तौ दीनबन्धुं पर्यङ्कीभूत-दुग्धसिन्धुं मुहुर्मुहुः कण्टकितनूभ्यां स्तुवन्तौ स्यन्दनमारुरोहतु - स्तदा तुरङ्गमास्सारथीकृतकंसस्य विनमितांसस्य कराम्बुजचुम्ब्यरुणकिरणायमाण - कनकवेत्रप्रचालनमात्रारब्धवेगविजितकुरङ्गमाः - खुरपुटोद्धूतपांसुपटलान्धी-कृतदशदिशावकाशाः मार्गपार्श्वनिकुञ्जेषु पुष्पायमाणखलीनगण्डान्योऽन्य-

In Public domain. Digitization Muthulakshmi Research Academy

सम्पीडनजनितफेनलेशाः - सुनिश्चलोर्ध्वसमकोणविभासमानश्रवणलाङ्गूल-कुसूला हेषाप्रतिध्वनि निर्मूलितगिरिझ्झुरीकूलसालताला - स्सर्वत्र स्वस्वेदपरिषिक्तं सकलजन्तुसमूहैर्बहुलभयात्सन्त्यक्तं - निम्नोन्नतं पश्चात्पलायमानगहनविविधवृक्षगुल्मवल्लीप्रसाधितपक्षसंयुत - मटवीमार्गं चूर्णीकृताल्पशिलावर्गमतिक्रम्य मधुरासमीपं प्राविविशुः।

मञ्जरी - पूर्वकल्याणी - त्र्यस्रः

१पा ॥ अथ भगिनीं भावुकं स - मादरेण दृष्ट्वा ।
पथश्चित्राणि कंसोऽ - वर्णयत्स हृष्ट्वा ।
२पा ॥ पश्यतामहो द - म्पती अमून्हालिकान् ।
वश्यमानपशुगणा - न्भरिततृणोद्दालकान् ।
३पा ॥ केचिद्विश्रमार्थं - केचिद्विहरणार्थम् ।
सूचयन्तोपयन्ति - स्फुरत्खगाः सार्थम् ।

६५. जपापुष्पच्छाया - मयमखिलवस्तुषु किरन् ।
प्रदीचीदिग्भागे - विगलति रविर्मन्दकिरणः ।
अहो सन्ध्यावातः - प्रसवमधुगन्धप्रसविता ।
तनूतापं हन्ति - प्रकटितभुजङ्गोत्सवकरः ॥

६६. भूगोलस्यैकार्धे
वार्धक्यमयं परे स्वतारुण्यम् ।
दर्शयति लोकबन्धु ।
र्व्यसनोदययोस्समानुरागेण ॥

६७. प्रवृद्धार्केन्दुकिरणैः परिपूर्णं दिगन्तरम् ।
शोकानन्दाश्रुसम्पातैः प्रसूताक्षितलं यथा ॥

In Public domain. Digitization Muthulakshmi Research Academy

६८. चण्डप्लुतैर्भीतिवशाच्चलन्तम् ।
पश्चान्मृगीशाबकुटुम्बमेषः ।
धीरस्वनेनाभयमाब्रुवन्नः ।
पश्यत्यहो वल्गितकृष्णसारः ॥

ग ॥ देवकीवसुदेवावपि - कंसनृपेण पिशुनवशीभूतव्याघ्रेणेव प्रशमितक्रूरकर्मणा सहमार्गचमत्कारान्पश्यन्ता - वागाम्य सङ्केलीमहोत्सवं महुर्मुहुः पुलकिततनूभ्यां स्मरन्तौ - परस्परं प्रेमरसं नेत्राभ्यां पिबन्तौ - प्रोद्भूतमन्मथोन्मादमतिकष्टेन शमयन्तौ - पुष्पितकर्णिकारवृक्षैरिव दीपावलीविराजितभवनैः प्रदीप्यमानां - चलत्पताकाभिराह्वयन्तीमिव स्थितां - समुत्कण्ठितजनकोलाहलतूर्यनिनादैस्समुद्रघोषामनुकुर्वतीं - मधुरानगरीं प्रविश्य - नूतनवधूवरविलोकनकुतूहलायत्तचित्तानां - विचित्रभूषणालङ्कृतानां - सर्वोत्कर्षेण वर्धेतामित्याशिषः कुर्वाणानां - सौधगवाक्षद्वारस्थितानां - सरभसवशाद्गलितांशुकधम्मिल्लबन्धानां - मन्दस्मिताननचन्द्रमण्डलानां - पौरकामिनीनां पुष्पाञ्जलिभिरभिषिच्यमाणौ चिरं राजपन्थानमलङ्कृत्वा - भगवति लोकबान्धवेऽस्तङ्गते - बहिर्निक्षिप्त कंसतमोगुण इवान्धः-पटलेऽभिव्याप्ते - तमिस्रनीराधरितनभस्थले प्रतिफलितहीरराश्यामिव प्रस्फुटितायां ताराश्रेण्यां - जारपातककलङ्के सम्पूर्णशशाङ्के समुदिते - वन्दिजनसंस्तूयमानावन्तःपुरं प्राप्य यथासुखमासाताम्।

मधुरगतिः वसन्तरागः - खण्डः

१पा ॥ अत्रान्तरेऽपि मदनानल इवाञ्चितम् ।
धात्रीजपल्लवपदं मधुपसञ्चितम् ।
२पा ॥ परपुष्टदम्पती - प्रततान कूजितम् ।
सुरसारराजसं - स्फुरत्फलयोजितम् ।
३पा ॥ सकलजनबान्धवं - सञ्चकारव्यजः ।
प्रकटदर्पेण विर - राज मकरध्वजः ।

In Public domain. Digitization Muthulakshmi Research Academy

६९. विमलज्योत्स्नापूरः ।
स्वनद्भ्रमरपरभृतशुकसञ्चारः ।
मत्तभुजङ्गविहार ।
श्चैत्राकारो दिनान्तसुकुमारः ॥

७०. वसुदेवः सन्निनाय - स्ववशदयितया - पञ्चबाणस्य केली ।
जलयन्त्रपान्तशीत - प्रसवमधुलिह - द्भृङ्गसङ्गीतकुञ्जे ।
मणिहर्म्ये चूतरम्भा - वकुलपरिवृते - मन्दवातानुकूले ।
गिरिमूले बर्हिगन्ध - प्रसृतवनझरी - सैकते सिन्धुकूले ॥

मञ्जुगतिः केदारगौडः - चतुरश्रः

१ ॥ कतिपयकाले भोगविशाले - गर्भमदधात्कृशाङ्गी ।
रतिप्रतिकूला पाण्डुकपोला - राजितचूचुकभृङ्गी ।
२ ॥ अलसगतिर्मृत्सक्तमतिस्सा - यासमुन्दालापा ।
जलपूर्णाङ्गी निद्रापाङ्गी - स्रस्तकाञ्चीकलापा ।
३ ॥ वसुदेवसतीप्रथितगुणवती - वर्धितस्तननितम्बा ।
रसनाचपला कबरी विपुला - रम्यमुखचन्द्रबिम्बा ।

७१. निजस्वसारं परिपूर्णगर्भिणीम् ।
विदन्नृशंसश्शकितोऽथ कंसः ।
बबन्ध कारानिलये सनाथाम् ।
शुकीमिव स्वामियुतां किरातः ॥

७२. देवकी प्रासूत सूनुं रम्भारम्याङ्कुरं यथा ।
कंसाय वसुदेवस्तं सत्यबद्धस्समार्पयत् ॥

In Public domain. Digitization Muthulakshmi Research Academy

७३. कंसोऽतिक्रूरहृदयः सद्योजातं तमर्भकम् ।
पापी व्यापादयामास विशाबमिव मर्कटः ।।

७४. इत्थं वदन्तं शुकतापसेन्द्रम् ।
पप्रच्छ राजाथ दयार्द्रचित्तः ।
मुने कथं बालवधाय कंसो ।
निष्कारणद्वेषमतिर्बभूव ।।

७५. तदा शुकः प्रत्यवादीत्कालनेम्याख्यराक्षसः ।
कंसो भूत्वा हरिद्वेषाच्छृणु राजंस्तथाकरोत् ।।

बेगडः - चतुरश्रः

उ ।। अकारणभूतहिंसां - चिकीर्षति यस्स एवासुरः ।
ध्रु ।। प्रकुपितोऽप्यपराधिन - मुपकरोति यस्स एव भूसुरः । ।।अ।।
१पा ।। अतिदैन्ययुतं पश्य - न्नश्रून्न विकिरति यः ।
पतिव्रतायां निन्दा - वाक्यं व्याहरति यः ।
आ ।। पितृमातृविहीनशिशुं - प्रेम्णा नालोकयति यः ।
सततं तं दूरं व - र्जयन्ति बतापि यतयः । ।।अ।।
स्व ।। सनीधप मधापमग - रीगम पधामधप ।
सारिनीधपम - गा धपामगरि । ।।अ।।

७६. सत्स्वपि धान्यादिषु सं ।
प्रकटारोग्येषु सुलभमूल्येषु ।
अपराधरहितजन्तू ।
नुदरम्भरयो वृथैव हिंसन्ति ।।

७७. अहिंसा परमो धर्म इति ज्ञात्वा कपोततः ।
कश्चिद्व्याधः कृतार्थोऽभूत्तत्कथां शृणु भारत ।।

In Public domain. Digitization Muthulakshmi Research Academy

मञ्जरी - भैरवः - चतुरश्रः

१पा ।। आसीत्पुरा कदम्बनिम्बशा - खाद्यनेकभूमिजा ।
वासिताखण्डशरभकेसरि - व्याघ्रादिमुनिसमाजा ।
२पा ।। सन्ततसान्द्रतमिस्राञ्चितकी - शप्रमुखकुञ्जभूषा ।
कान्तानेकविचित्रवर्णयुत - खगनिवहभूरिघोषा ।
३पा ।। दारुणविषदर्वीकरनिश्वसि - तप्रभूतदावमुखी ।
सारसकैरवशोभितसरःप्र - सारितशीताग्निसखी ।
४पा ।। चटुलमहीधरतुङ्गशृङ्गस - श्चलितझरीपरिषिक्ता ।
अटवी शतयोजनविस्तारा - त्यद्भुतनवरसयुक्ता ।

७८. तत्र मृगयाभिलाषी ।
मदघूर्णितभीकरोरुनेत्रयुगः ।
तीव्रपरशुबाणधरः ।
कदाचिदचरत्किरातकः कश्चित् ।।

७९. तदा हठान्नीलपयोदपङ्क्तिरुत्थाय गाढान्धतमः किरन्ती ।
रेभे मुहुर्वर्षितुमत्र विद्युद्गर्जाशनित्रस्तसमस्तसत्वा ।।

८०. वर्षोपलविशीर्णाङ्गो दुश्शीताम्बुहतः पुनः ।
गतचेष्टोऽथ सव्याधो रुदन्नित्थमचिन्तयत् ।।

वराली - मिश्रः

उ ।। हा कष्टं धिग्दैवविपाक - महमित्थम्मेप्रा - णालिं त्यजेयम् ।
ध्रु ।। शोकनिमग्न - स्सुतदारान्नाना - लोकयन्नकथमाक्रन्देयम् ।
१पा ।। जीवेयं यदि कि - ञ्चिदग्निं लभेय - शीताबाधाम्परिभूय ।
पावक इव मम - ज्वलति बुभुक्षा - भवेयं किमित्थं सुचिराय ।।

In Public domain. Digitization Muthulakshmi Research Academy

८१. पक्षिणः कोटरं कुञ्जं मृगान्सत्वान्गुहोरगान् ।
गोपायत्यद्य वल्मीकमहमेको निराश्रयः ॥

८२. नास्त्यद्य वर्षबाधा ।
किन्तु दशति मां विषानिलश्शीतः ।
सन्ध्यागाढतिमिरतः ।
करोमि किं मार्गमपि न पश्यामि ॥

किं लभेय स - मत्प्रियैकसुतस्मिताननचुम्बनम् ।
किं भजेय न - मामकीनहृदीश्वरीपरिरम्भणम् ।
किं भवेय न - मातृतातसहोदरेक्षणतोषणम् ।
किं ब्रुवीय न - भाषणं हितबान्धवश्रुतिभूषणम् ॥

८३. अशक्तं रोदितुमपि मरणे कृतनिश्चयम् ।
तदा कपोतराट्कश्चित्तं पश्यन्भार्ययाब्रवीत् ॥

कर्णाटः - एकः

उ ॥ प्रिये पश्यैनं - वीतचेष्टितं दीनम् ।
ध्रु ॥ भयकृद्वर्षवातनिहतं - प्राणाशाविरहितम् । ॥प्रि॥
१पा ॥ मुहुर्बाष्पान्मुञ्चति - मुहुर्बन्धून्विलपति ।
मुहुर्दीर्घं निश्वसिति - मुहुर्मूर्च्छति प्रलपति । ॥प्रि॥
२पा ॥ मुहुर्गन्तुं तिष्ठति - मुहुरशक्तिः पतति ।
मुहुराक्रोशति शरणार्थं - महो कष्टमतति । ॥प्रि॥
स्व ॥ ममरिसनिसरिस - पपमगमापध - पनिसरिसमरिस ।
निरिसनिसापनि - धनिधपमापस - रिननिसा निधा -
पमपगा मपध नीधामपम । ।प्रि॥

In Public domain. Digitization Muthulakshmi Research Academy

८४. कथमुपकरोम्येतं भीतं - किमद्य हि साधनम् ।
कथमुपलभेयान्नं खिन्नं - कथं परिमोदये ।
अमुमपि शिखी शीतात्त्रातुं - स कुत्र विमृग्यते ।
हरिहरिहठादेनं दीनं - न हिन्धि वृथा विधे ॥

८५. विपन्नमेनं दृष्ट्वा मे क्षुभ्यते हृदयं भृशम् ।
तस्यावस्था मया प्राप्ता दयापि बत दुस्सहा ॥

८६. दयासमुद्रस्सर्वेश आर्तजन्तुहृदि स्थितः ।
आक्रन्दनच्छलेनैव समाह्वयति धार्मिकान् ॥

८७. निरर्थकं तस्य जन्म दीनान्नोपकरोति यः ।
तस्मात्सञ्जीवयिष्यामि मेऽङ्गं दत्वापि सुन्दरि ॥

मञ्जरी - मालवगौडः - मिश्रः

१पा ॥ इति दयार्द्रितहृत्पुटो जव - जितमरुत्कविभूषणः।
गतभयो व्यगमत्समीप - ग्राममाश्रितपोषणः ।
२पा ॥ दहनसंज्वलितेन्धनमसौ - गृहीत्वा पुनरागतः ।
गृहे स्वीये तृणमये त - त्र हित्वा संवेगतः ।
३पा ॥ भूतले शुष्के तद्वहं - पातयित्वा पक्षतः ।
स्फीतं प्रजल्वयन्नास कि - रातकस्य समक्षतः ।

८८. अथ किरातपतिर्ज्वलितानलम् ।
स्वनिकटे समवेक्ष्यहठात्स्थितम् ।
विवशिताङ्घ्रिकरोऽप्यतियत्नतः ।
समुपविश्य स इत्थमतर्कयत् ॥

In Public domain. Digitization Muthulakshmi Research Academy

८९. आश्चर्यमाश्यर्यमहोमदिष्ट ।
माकस्मिकं पावकमत्र वीक्षे ।
इदं किमु स्वप्नकृतं हि तन्न ।
भ्रमो मदीयोऽपि न सत्यमेव ॥

९०. विचिन्तयन्नत्र समन्दमन्दम् ।
शीतेन काष्ठीकृतकुञ्चिताङ्गः ।
गत्वातिशीघ्रं ज्वलयंस्तदाग्निम् ।
यथासुखं व्याधपतिः प्रतस्थौ ॥

९१. अत्रान्तरे तेन दृष्टः समीपे सत्फलेन्धनम् ।
विचिन्वानः सुखासीनः सविश्वस्तः कपोतराट् ॥

९२. दृष्वा हृष्ट्वा भृशं व्याधः करेण विहगोत्तमम् ।
सङ्गृह्य करुणाविष्टः सम्यगित्थं व्यभाषत ॥

तोडिः - रूपकः

उ ॥ साधु रे कपोत - सत्करुणोपेत ।
ध्रु ॥ छेदितमच्छीत सु - स्नेहौदार्यसमेत । ॥सा॥
१पा ॥ तिमिराम्बुधिमग्नं मां - दीनमपश्यः कथम् ।
अमित्रे दयाजनितेऽ - त्यद्भुतमेतद्विधम् ।
स्व ॥ सगामगमधमधनिधम - धमागमगरिगरिसरिनि ।
सगारिमागधामनी - रिनीधमनिधामग - धमागरि ।
समागधमगमगरिसनि ॥ ॥सा॥
२पा ॥ घोराटव्यां दहनं - कुत्र समाप्नोस्त्वम् ।
वैरिणि मय्यशिश्रियो - वद ते चित्रं तत्वम् ।
स्व ॥ रिनिनिधनिस रिगमगरिस - रिगमगधमनि सगरिसनिध ।
निरीनिसानिधामनी - ससनिनिधध ममगगरिरिसस ॥ ॥सा॥

In Public domain. Digitization Muthulakshmi Research Academy

९३. दुश्शीतवर्षनिहतं तव नैजशत्रुम् ।
दीनं दयाहृदय मामदिथास्त्वमित्थम् ।
तस्मादितः परमहं त्वदुदारवृत्ति ।
र्मां सन्त्यजामि न करोमि कदापि हिंसाम् ॥

९४. इत्थं वदन् स भिल्लेशः प्रभाते स्वगृहं ययौ ।
अहिंसा परमो धर्मस्तस्मात्सत्यं वदाम्यहम् ॥

९५. इति ब्रुवाणं मौनीन्द्रमभिमन्यात्मजोऽवदत् ।
ब्रूहि गोविन्दजनन कथां तापसपुङ्गव ॥

९६. सदा सुभक्तश्रुतिभूषणानि ।
महाघदुःखाब्धिविशोषणानि ।
आनन्दनिश्रेयसपोषणानि ।
हरेर्मुरारेर्गुणभाषणानि ॥

९७. इति श्रीकृष्णचरितमिच्छन्तं कुरुभूपतिम् ।
समारेभे कथां वाचा शुकयोगी सुधामुचा ॥

मञ्जरी - मलयमारुतः - खण्डः

१ ॥ अष्टमं गर्भमदधात्सापि देवकी - त्यजति कंसे विपुलगर्वम् ।
भ्रष्टसकलापदि विहृष्टसुरमण्डले - भजति वसुदेवेऽक्षिपर्व ।
२ ॥ बृन्दावने गोपगोगणे सन्ततिस - मृद्धिं वहति दर्शनीये ।
नन्दव्रजे सुफलपूर्णसस्यावलिं - तन्वति स्वादुपानीये ।

९८. कतिपयकाले प्राप्ता ।
श्रावणबहुलाष्टमीजयन्ती सा ।
देवक्यां सुगुणाढ्याम् ।
सत्यां सम्यक्प्रपूर्णगर्भिण्याम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

९९. तस्मिन्निशीधसमये वसुदेवपत्नी ।
भ्रातुर्भटैः परिवृता बहुजागरूकैः ।
कारागृहे निजतपःफलपुञ्जमूर्तिम् ।
नारायणं सुतमसूत जगत्प्रपूता ॥

चक्रवाकः - त्र्यस्त्रः

उ ॥ जगदीश्वरो नारायणो - जनयामास ।
ध्रु ॥ निगमालिभावितो - नृलीलाङ्कैर्ललास । ॥ज॥
स्व ॥ ममगरिसनि - धनिसरिगम । पमगमपध - निनिधधपम ।
गमपमपध - पधनिधनिस । निसरिसनिध - पदनिधपम ।
सास्सनिधप - नीन्निधपम - धाद्धप । ॥ज॥
१पा ॥ स्फुरच्चक्रलाञ्छितः - सुजनहृदयवाञ्छितः ।
वरलीलाविग्रहः - परमभक्तानुग्रहः । ॥ज॥

१००. तदा ब्रह्मादिदिविजाः क्रमशो विष्णुकीर्तनम् ।
अर्धोन्मीलितनेत्राब्जा बद्धाञ्जलिपुटाजगुः ॥

ब्रह्मा - हंसध्वनिः - त्र्यस्त्रः

उ ॥ देव देव विष्णो - त्रिगुणातिचरिष्णो ।
ध्रु ॥ सेवकवर्धिष्णो - श्रीवत्सालङ्करिष्णो ।
आ ॥ केवलनिर्मलानन्द - कीर्तनीयगोविन्द ।
स्थावरजङ्गमरूप - स्तौमि त्वां जगद्दीप । ॥दे॥
१पा ॥ आदिमध्यान्तरहित नि - त्याप्रमेयसद्धिहित ।
वेदविद्यास्वरूप - विध्वस्ताखिलपाप ।
आ ॥ नेदं विश्वसत्यं - निखिलं तव लीलाकृत्यम् ।
मोदसे त्वमित्थमद्वैतमूल - मोक्षदायकदयालवाल

In Public domain. Digitization Muthulakshmi Research Academy

स्व ॥ गरिसनि - पसरिनि - सरिगप - निरिनिप - सरिगरिसनि ।
सरिसनिपसनिप - नीगारि - नीरीनि - पानीरि । ॥दे॥

२पा ॥ त्वमित्यहमितिस - तदिदमिति ।
भ्रमोपहता वयं - परंतेजोमूर्तिरयम् ।

आ ॥ क्रमादवतरसि जगद्रक्षणतत्त्वं - कपटनाटकसूत्रधारस्त्वम् ।
नमो नारायणाय जग - न्नाथाय वासुदेवाय ॥ ॥दे॥

स्व ॥ सगगारिस-निरिरीसनि-पससानिप-निपसनिरिसगरिपगारि। ॥दे॥

१०१. एकोऽपि त्वं समस्तं - प्रभवसि भवितुं - स्थूलसूक्ष्मक्रमेण ।
त्रैगुण्यं विश्वमेतत्त्वयि भवतितरां - कोणवच्चक्रमध्ये ।
कर्ता भोक्ता त्वमेव - प्रकृतिरियमस - त्तावकीनेन्द्रजाल ।
स्त्वज्ञानान्नास्ति किञ्चि - न्निरवधिपरमा - नन्दनिर्द्वन्द्वमूर्ते ॥

१०२. कर्तास्ति किंवा ज - गत इति कृत्रिम - शास्त्रार्थचिन्तनै-श्शङ्क्यमान ।
पण्डितम्मन्येषु - वञ्चितेषु चतुर - संसृतिगणिकया - सत्स्वपीह ।
भागवतास्सुवि - श्वासहताखिल - संशयास्तावक - चरणकमल ।
भजनामृतास्वाद - परवशा नित्य र-माश्लेषणेन सु - ख्यन्ति हन्त ।
तव दयां न विना श्रद्ध - धाति कोऽपि । भवति न श्रद्धया विना - भक्तिमांस्तु
भक्तिमन्त्रान्तरेण न - मुक्तिरस्ति । हे जगन्नाथसंश्रित - हृद्विबोध ॥

१०३. कारणं त्वं हि जगतो निर्गुणोऽपि विलासवान् ।
त्वच्चरित्रं महाचित्रं नारायण नमोऽस्तुते ॥

त्र्यम्बकः - भैरवी - चतुरश्रः

उ ॥ जय जय जगदीश - हरे कृष्ण - जय जय भवनाश ।

आ ॥ दयासमुद्रभवदीयमाया - मयं जगन्निगमपारायण ।
स्वयं ज्योतिस्त्वं परमपुरुष - सकलादिकारण नारायण ।

In Public domain. Digitization Muthulakshmi Research Academy

१पा ।। आदिमध्यान्तरहित हरेकृष्ण - प्राञ्चितानन्दसहित ।
आ ।। वेदा अपि न शक्नुवन्ति त्वां - वेत्तुं निर्गुणब्रह्मत्वम् ।
श्रीदयितालोलसन्तता - श्रितपाल त्वमेव परतत्वम् ।
स्व ।। गगरिसनिधनिसरिगमपमगरिस - निनिधपधमपधसनिधपमगरिस ।
गारिमागपामधापनीधसा - निरिनीदपमधापमगरिपमागरि ।। ।।ज।।

१०४. संवर्ध्यमानतृ - ष्णारुजाक्रान्तव - यसि गलितेऽतिमि - थ्याविवेक ।
तस्करेणापहृ - तनिजविश्वासवि - भव इह तावक - भक्तिहेति ।
महहसमुद्धर्तु - मप्यशक्तो भव - न्दुख्यन्परिभ्रम - न्दुस्तर भव ।
विपिनेऽरिसत्ववि - भीषण ईषण - कण्टके विश्रान्ति - कष्टमार्ग ।

एव तापत्रयाभील - दावपाव ।
कावृते मर्त्य उग्रमृ - त्व्यजगरेण ।
कबलितो नश्यतितरां प्र - कम्पमाप्य ।
हे जगन्नाथ संश्रित - हृद्विबोध ।।

१०५. जपहोमव्रतैर्दानैस्तपसा न हि शक्यते ।
ज्ञातुं त्वदीयमाहात्म्यं भक्त्यैव परमेश्वर ।।

दिक्पालकाः - ब्यागः - चतुरश्रः

उ ।। नमो नारायणाय - नमस्ते वासुदेवाय ।
ध्रु ।। समस्तादिकारणाय - सततं महानुभावाय । ।।न।।
आ ।। अमलानन्दकन्द - कृष्ण - हरे गोविन्द मुकुन्द ।
विमददैत्यतिमिरपतङ्ग - विपुलदयान्तरङ्ग भवभङ्ग । ।।न।।
१पा ।। अनवरतं शश्वद्धयसि - नोऽष्टदिक्पालकान्नियोजयसि ।
दनुजान् हंसिमहोपकारीत्वं - तनुषे दासेभ्यः परतत्वम् ।। ।।न।।

In Public domain. Digitization Muthulakshmi Research Academy

१०६. सत्यमनन्तं - समधिकमहिम - भ्राजितमाश्रित - भवभयनाशम् ।
नित्यमखण्डं - निरवधिगुणवि - स्तारमभीष्टद - मनुपमकीर्तिम् ।
संश्रितरक्षा - चणमतिकरुणा - सान्द्रमवेद्यम - खिलजगदीशम् ।
शाश्वतमूर्तिं - सकलजनगुरुं - त्वामवितुं न हि - वयमपि शक्ताः ।।

ब्रह्मर्षयः - सावरिः - त्रिपुटः

उ ।। करुणावार्निधे विष्णो - कौस्तुभालङ्करिष्णो ।
शरणं त्वां प्रपद्यामहे शयनीकृताहे ।
मे ।। गुरुतरसंसार - कूपारनिस्तार ।
दुरितदवानल - दुःखार्तिसंहार ।
आ ।। चरिष्यसि किं लीलामानुष - शरीरेणेतःपरम् ।
सरसजगन्मोहनरूपं - सन्दर्शयसि किमघहरम् ।
स्व ।। धामगरिसगरिसरिसनिधप - धासपाधपासरिमगरिस ।
रीमरीपमाधपासनिध - रीसधासपासनिधपमगरिसरि ।। ।।क।।
१पा ।। सकलकर्ता त्वमेव - सकलभोक्ता त्वमेव ।
सर्वज्ञमूर्तिस्त्वं - सदा वासुदेव ।
मे ।। अकलङ्कचक्राङ्क - स्वध्वर प्रभो कृष्ण ।
चकितभक्ताभयप्रद - सन्ततगततृष्ण ।
आ ।। सकलमिदं विश्वं चित्रं - स्वप्रसदृशमपि तव लीलया ।
ह्यकुटिलसत्यस्वभाव - मातनोत्यमितवेलया । ।।क।।
स्व ।। रिसधसरिसधसपधपनपधपरि - सरिगसरिमगरिसरिपमपनिधम ।
पदसनिद - रिसरिधस - धपधमप - रिसरिधसरिमगरिसधरि । ।।क।।

मङ्गलमहाश्रीः

लोकमय ते चरित - मित्थमिति वेत्तुमहि - राट्प्रभवतीह स न वा ।
त्वय्यखिलभूततति - रुद्भवति पल्लवति - सल्लयति - दिव्यवियदि ।

In Public domain. Digitization Muthulakshmi Research Academy

भ्रान्तिरिह नो दुरभि - मानमयसंसृतिवि - शृङ्खलनिबद्धपदवी ।
नाट्यनिगमं त्वमपि - नाटयसि भो भुवन - नाटकपरापर हरे ।

१०७. सदा समस्तं त्रैलोक्यं विद्वान्मिथ्येति संस्मरन्
संसारसागरोत्तीर्णस्त्वमेव भवति प्रभो ॥

१०८. हव्यं कव्यं गव्यं । नव्यं प्रापयसि भक्तसङ्घेभ्य ः ।
देवाः पितरस्तृप्य । न्त्यहर्निशमनुग्रहेण तव कृष्ण ॥

नारदः - नाटकुरञ्जी - चतुरश्रः

उ ॥ भक्तपारिजात - परमेश्वर ।
ध्रु ॥ शक्तोऽहं किं त्वां - स्तवीतुमविनश्वर । ॥भ॥
आ ॥ सक्तमतिः संसारे परि - मुक्तधृतिर्निस्सारे ।
त्यक्तुमप्यनुभोक्तुं नो - प्रभवत्यहङ्काराच्छन्नो । ॥भ॥
स्व ॥ गगामगरिसगरिसनीसरि - निसारिनिसरिनिसनिधनिधम ।
गगामगगाधममानिरिनीस-मगासनिधामगधाम समागमधासगम। ॥भ॥
१पा ॥ नामरूपादिस्वधर्मा - न्नारोपयति त्वय्यवशकर्मा ।
भो मुकुन्द स नोऽक्षानन्दकन्द - त्वामेव पश्यन्ति तव दासा गोविन्द ।
आ ॥ स्वामिन्नलमेन - मे वाचा - शतेन शिशुजल्पितेन ।
धीमानोऽपि त्वां न वेत्ति - त्रिगुणातीतामृतं नात्ति । ॥भ॥

१०९. अस्ति नास्तीति सन्देहाकुलो भवति तार्किकः ।
त्वत्पादभक्तस्सततं । रमते मुक्तिकान्तया ॥

११०. नहि वेद्म्यहं स्तन - न्धयदशायाम्मदी - यानुभूतिः कथमन्वभावि ।
शैशवेऽपि निशान्त - समय इवास्फुट - परिमितवस्तुनि - वहमदर्श ।
महह ततो यौव-नेऽद्राक्षमिव विप-रीतजगन्मद्यपीतिरद्य ।
शङ्कावशेन न - शक्नोमि निश्चेतु - मिदमित्थमिति किम - पीह मां तु ।

In Public domain. Digitization Muthulakshmi Research Academy

शास्त्रलवदुर्विदग्धमा - जन्ममुग्ध ।
मघविनिर्मग्नमखिलदु - र्व्यसनलग्न ।
मत्यहंयुमात्मम्भरि - मनुगृहाण ।
हे जगन्नाथ संश्रित - हृद्विबोध ।।

पूर्वकल्याणी - एकतालः

उ ।। सुजनावनमोद स - र्वजगन्नाथगानविनोद ।
ध्रु ।। विजितघोरकलुषविश्वमोहन - अजेन्द्रामरमुनिविनुतपाद ।
१पा ।। अनवरतदयाब्धे साधुवाद - प्राज्यलोकमूलवेदनाद ।
जननमरणरहितामृतास्वाद - शाश्वतैश्वर्यसदाभेद ।
स्व ।। निधमगरिधमगरि - मगरिगरिरिसधा - धासरिगमामागरिस ।
द्रुतम् । धिरुगुडुथथैहदों थरिधों जगणतणगकिण - धिरुगुडु धिरुगुडु थथैहत्था।
हत्थाधिरुगुडुथाधिरुगुडु तधिन्नाहं थातदधिगिणत थातदधिगिणत
थातदधिगिणत । ।।सु।।

१११. बाल्ये वयसि सर्व - वस्तुषु महिमान - महमवश्यं सरि - दहह काक ।
पेयापि विपुलग - म्भीराभवत्स्वल्प - वृक्षोऽत्यनूनोव्य - लक्षिहन्त ।
सकलजनान्व्यश्व - सममुत्र सर्वत्र - चैतन्यमिह मया सम्यगैक्षि ।
मम मानसे सदा-त्वमुवास निर्मले - ह्यानन्द एव ततोऽन्वभावि ।
सम्प्रति समस्तजगति नि - स्सारतास्ति कलुषितम्मे मनोऽभव - द्गलितवयसि।
तोयनिर्मुक्तझुष इव - दोधुनोमि हे जगन्नाथ संश्रित - हृद्विबोध ।।

११२. नारायणं स्वीयपुत्रं निजरूपविभासुरम् ।
देवकीवसुदेवौ तौ तुष्टुवाते जगत्प्रभुम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

दण्डकम्।। जयजयसर्वलोकेश - सर्वज्ञ - सर्वान्तरात्मन् - जगत्सृष्टिसंस्थापनोत्पाटन प्राभव - स्फारचक्रादिनानायुधोपेत - दुर्वारसंसारजीमूतवातूल - वेदान्तवेद्य - प्रभो - नक्रसङ्ग्रस्तदन्तावलप्राणसंरक्ष - विक्रूरदैतेयसंपद्विपक्ष - श्रिताघाटवीदाह - तार्क्ष्योरुपाह - द्युमन्नीलदेह - प्रणिद्राविमत्ताब्जसम्भूत चञ्चच्चतुर्वक्त्रपेटीलसद्वेदचोरासुरप्राणनिर्मूलनप्राभवाञ्चद्विहार - स्फुरत्सर्व-कालान्तवार्धिप्रचारोरुमीनावतार - प्रसिद्धामृताध्य क्षरस्फारवस्तु प्रसूतिप्रधानाततक्षीरकन्थि भ्रमद्भूरि मन्थानधात्रीधराधीशसङ्घर्षण श्रान्तपृष्ठाग्र-कण्डूतिपूर - श्रितप्राणपारीणकूर्मावतार - स्थिराघात कोन्मत्तमेमाक्षदोर्मुक्त धात्रीकलङ्कीकृत स्वच्छदंष्ट्रोद्धुर श्रीवराहावतार - स्वयंभूवर प्रापितोद्दर्व-विभ्राजित स्वर्णनेत्राग्रजप्राणसंहार माद्यन्नृसिंहावतार - त्रिलोकीचल-त्यादकुब्जावतार - प्रजापीडनासक्तभूमीशरक्तप्लुतार्घ्यप्रदानप्रहृष्टात्म पित्र्यप्रकाण्डप्रदीपत्कुठारोज्ज्वलद्धात्रिदेवावतार - स्वभार्यापहार योद्यद्दशग्रीव-कण्ठाटवीदाववह्नीकृताभीलदिव्यास्त्रपूर - प्रतापाढ्यरामावतार - प्रभो कृष्ण गोविन्द मां पाहि तुभ्यन्नमः ।।

काम्भोजी - त्रिपुटः

उ ।। शरणागतप्राण - संरक्षापारीण - करुणालोकनश्रीजगत्प्रभो ।

ध्रु ।। सुरमौनिनुतपाद - सुजनावनामोद - करिराजाभयदायक - जगन्नायक ।

आ ।। गुरुसंसारपयोदानिल - दुरितघोरविपिनदवानल ।
तरणितारकानाथेक्षण - निरतभक्तजनसंरक्षण । ।।श।।

१पा ।। लीलामानुषरूप - लालतसल्लाप - नीलकान्तिकलाप - निखिलभुवनदीप।

आ ।। कालकण्ठवन्दित - गुण - जालविबुधनन्दित
सच्छीलसंश्रितजनानुकूल - स्थिरदयालवालगोपाल ।

स्व ।। निनिधधपमपधपसासनिध - रिसरिधसरिगम गगरिसनिध ।
पदपसासपधपरिसरिगरि - मगरिसानिधपामगरिसरिगरिस ।। ।।श।।

In Public domain. Digitization Muthulakshmi Research Academy

११३. यस्य सङ्कल्पमात्रेण लोकसृष्टिस्थितिव्ययाः ।
भवन्ति मम पुत्रस्स किमैश्वर्यमितःपरम् ॥

११४. इत्थं बद्धाञ्जलिपुटावद्भुताह्लादसंयुतौ ।
स प्राह मातापितरौ कृष्णः संश्रितवत्सलः ॥

११५. भो मातापितरौ कंसं प्रहणिष्यामि बन्धनात् ।
युवां प्रमोचयिष्यामि हरिष्यामि भुवो भरम् ॥

११६. नन्दात्मजां समाकृष्य तत्स्थाने मां निवेशय ।
भद्राणीतःपरं भक्ताः प्राप्नुवन्तु समन्ततः ॥

११७. इत्थं वदन्देवदेवः सामान्यार्भकवत्स्थितः
तं कृष्णमात्मजं वीक्ष्य मङ्गलं गायतः स्म तौ ॥

सुरटः - त्र्यस्रः

उ ॥ मङ्गलं भवतु ते र - मासुनायक ।
ध्रु ॥ रङ्गदुत्तुङ्गकरि - प्राणदायक । ॥मं॥
१ ॥ आर्तपोषनीलजल - दाभविग्रह ।
कीर्तिभूषदुष्टदैत्य - कीटनिग्रह ॥ ॥मं॥
२ ॥ दीनबन्धो दयासिन्धो - दिविजरक्षण ।
गानलोललोकपाल - करुणावीक्षण । ॥मं॥
३ ॥ सारसजन्मादिदेव - सन्नुतपद ।
नारायणदासवन्द्य - नतसुखप्रद । ॥मं॥

११८. भक्त्येत्थं कृष्णजननकथाविरचिता मया ।
श्रीनारायणदासेन कवितागानशालिना ॥

In Public domain. Digitization Muthulakshmi Research Academy

श्रीहरिकथामृतम्
द्वितीयबिन्दुः
पितृबन्धविमोचनम्

११९. वन्दे मुकुन्दमाश्रित ।
गोबृन्दं सम्प्रबुद्धमुचिकुन्दम् ।
गोविन्दं मुक्तिलता ।
कन्दं करुणामिलिन्दमानन्दम् ॥

कल्याणी - रूपकः ।

उ ॥ पाहि मां गोपाल - भागवतजनानुकूल ।
ध्रु ॥ देहकान्तिविजितनील - दिव्यानन्दालवाल ।
आ ॥ ऊहातीतश्रीलां - होगर्वोन्मूल ।
मोहितगोपीजाल - मुरलीगानविलोल । ॥पा॥
१ ॥ लीलामानुषवेष - ललितकौस्तुभभूष ।
कालियफणिपतिभीष - श्रीललनासन्तोष ।
आ ॥ कालिकागभीरभाष - घनभववार्निधिशोष ।
नालिकालयाब्जपूष - नारायणदासपोष । ॥पा॥

केदारगौडः - रूपकः ।

उ ॥ एकदन्त पाहि माम - लीकधूनन ।
उ ॥ श्रीकरश्रितावना - नेकपानन । ॥पा॥
१ ॥ धीरकवीन्द्रप्रणुत - देहिमेऽभयम् ।
दूरीकुर सततं प्र - त्यूहसमुदयम् ॥ ॥पा॥
२ ॥ पाररहित महिमाकर - बालशशिधर ।
दारिताघनारायण - दास शुभकर । ॥पा॥

In Public domain. Digitization Muthulakshmi Research Academy

१२०. हेरम्बसंश्रित समूहदयावलम्ब ।
लम्बोदरत्रिणयनप्रियवक्तचन्द्र ।
भोगीन्द्रभूष सकलागमसारभाष ।
निर्विघ्नमद्य कुरु मामकचारुकाव्यम् ॥

कमाच् - त्र्यस्रः ।

उ ॥ शारदा सदा वसतु मु - दा रसनायां ममाद्य ।
ध्रु ॥ चारुदेहकान्तिविजित - सारदाति संमाद्य । ॥शा॥
१ ॥ वेदनूपुरस्फुरत्पदा - विधिप्रमदा ।
नादबिन्दुकलातीत - नारायणदाससुखदा । ॥शा॥

१२१. वेदात्मयुताराजित ।
वेदाङ्गाङ्गकलाकलापरता ।
इतिहासमन्दहासा ।
स्मृतिस्मृतिः पातु कापि देवी माम् ॥

मञ्जरी - चतुरस्रः ।

१ ॥ भागवतशिखामणिः पुरा शुक - योगीश्वरमभिनम्य ।
आगोरहितोऽवोचत्परीक्षि - दागमज्ञगुणरम्य ।
अ ॥ पायय मां कृपया हरिकथा - पीयूषं मुनिराज ।
धीयुत कथय हरिः कथं व्रजेऽ - मेयोऽचरदव्याज ।
२ ॥ इति विनयेन प्रार्थयन्तं - क्षितीश्वरं गुणवन्तम् ।
श्रुतिनिपुणो वैयासकोऽब्रवी - त्कृतकृत्यो बहुशान्तम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

हुशेनिः - रूपकः ।

उ ।। पाण्डवकुलतिलकमहीशद्वि - ड्वर्गनाश ।
ध्रु ।। अण्डजवाहचरित्रम - खण्डभवाब्धिवहित्रम् । ।।पा।।
१ ।। सकलश्रुतिसारमिदं - सततानन्दास्पदम् ।
अकलङ्कसावधान - मवधारय शुभदम् । ।।पा।।

१२२. देवकीवसुदेवौ त - त्कारागारनिवासिनौ ।
सद्योजातं वीक्ष्य पुत्र - मित्थं तर्कयतस्स्म तौ ।।

असावरिः - अड्डतालः ।

उ ।। किङ्कर्तव्यमितःपरमहहहा - क्लेशमात्मजं कथं रक्षाव ।
ध्रु ।। किङ्कर इवान्तकस्य कंसोऽपि - क्लेशिष्यत्येनं द्रागेव । ।।की।।
आवयोः प्रियतनयसप्तकं - हत्वापि न तुष्यति कंसः ।
देवदेव नौ पाहि दयालो - तेऽपि सहजशत्रुः स नृशंसः ।। ।।की।।
१ ।। सुन्दरश्यामलविग्रहप्रिय - सुत किञ्जातो मादृग्दीनतः ।
बन्दिकापि सम्प्रत्यन्धकार - बन्धुरा दीप्यते ते भानुतः । ।।की।।

ग ।। वसुदेवोऽपि बहुधेति विलप्य - कारागृहद्वाराण्यपि हठाद्विगलितबन्धनानि विलोक्य - निद्रापरवशान् द्वार्स्थितान्समीक्ष्याद्भुतनिमग्नचित्तोभवन्पूर्वनिगदितं नारायणवाक्यं परामृश्य - देवकीं परिरुदतीं सान्त्वयित्वा - गाढान्धकारं प्रदीपवदात्मतेजसा प्रध्वंसयन्तं स्वपुत्रकं गृहीत्वा - प्रसुप्तमिव चित्रार्पित मिव स्थितं - निश्शब्दराजमार्गं विरहितजनसञ्चारमतिक्रम्य - स्वप्न इवाद्भुत शीघ्रगमनशक्तियुक्तः - कृष्णसन्दर्शनानन्दातिशयोत्सवसंवर्धितप्रवाहायामपि यमुनायामनुकूलपन्थानमात्मनि ददत्यां सत्यां - षोडशयोजनानि निमिषकाले गत्वा - नन्दव्रजमुपगम्य - प्रदीपैः प्रदीप्यमानं - सुगन्धपरिमलमिलितं - निद्रापरवशीकृतसर्वजनं यशोदासूतिकागृहं प्रविश्य - तस्यास्सद्योजात बालिकामुद्धृत्य तत्स्थाने निजडिम्भकं समारोप्य - तत्क्षण एव बन्धनालयं

In Public domain. Digitization Muthulakshmi Research Academy

सह बालिकया संप्राप्य - स्वस्थो भवन्नघटितघटनापटिष्ठं पुरुषोत्तम-
मित्थं संस्तौतिस्म ॥

यदुकुलकाम्बोजी - रूपकः ।

उ ॥ देवदेव दयासिन्धो - दीनबन्धो कृष्ण ।
ध्रु ॥ कोविदावनोत्कण्ठवै - कुण्ठविगततृष्ण । ॥दे॥
१ ॥ शक्तः को महिमानं - ज्ञातुं तव विष्णो ।
भक्तश्शिवोऽपि भवति ते - भागवतचरिष्णो । ॥दे॥

१२३. श्रुत्वा शिशोरुदितमप्यतिवेगवन्ता ।
श्चारा उदन्तमथ भोजपतिं तदूचुः ।
स्वस्रेयमष्टममसौ दलितुं नृशंसः ।
कंसोऽपि बन्धनगृहं प्रविवेश सद्यः ॥

१२४. विस्मित्य बालिकां दृष्ट्वा हन्तुं तामपि निर्दयः ।
असिं दधौ तत्रान्तरे तं देवक्याह दुःखिता ॥

मुखारिः - आदिः ।

उ ॥ बालिकेयं न स्वस्रीयः पालयैनां - भ्रातः कृपया ।
ध्रु ॥ मा लुनीहिं मदन्त्यापत्यमपि - मा कुरु स्त्रीहत्यां निस्त्रपया
सूतिसप्तकमारणाद्बहु - शोचितापि तवसोदरी ।
भ्रातरं सम्मोदेनैव - त्वां पश्यति खिन्नोदरी । ॥बा॥

१२५. मैनां वधीः सपदि माऽजहिदुर्दशां ते ।
शङ्कापि मास्तु मम भाविसुतप्रसूत्याम् ।
वन्ध्यामिवार्यनुत मा कुरु मामवन्ध्यां ।
मा क्रोधमाप्नुहि वृथा प्रियसोदराद्य ॥

In Public domain. Digitization Muthulakshmi Research Academy

मञ्जुगतिः - नाथनामक्रियः - चतुरश्रः ।

१ ॥ इति निजपदयुग्मं गृह्णन्ती - मतिखिन्नामाक्षिप्य ।
सुतां स्वसुर्हन्तुं स क्रूरोऽ - यतत दूरमुत्क्षिप्य ।
२ ॥ तदा बालिका दुर्गारूपं - दधती दुर्जनभीमं ।
वदति स्मेत्थं त्रस्तं कंसं - वाक्यं सुहृदभिरामम् ॥

१२६. रेरे कंस नृशंस मूढ न हि तेऽ - हम्मृत्युहेतुर्वृथा
कारागारनिवासकष्टमनयो - स्सत्पूज्ययोर्मा कुरु ।
हर्ता भूमिभरं सदोत्तमजनं - भर्ता शृणुत्वादृश ।
क्रूराणां निधनं दिवानिशमुरी - कर्ता क्वचिद्वर्धते ॥

१२७. इति निगदितवत्यां - तत्क्षणेऽन्तर्हितायाम् ।
वियदधपरिपश्य - न्विस्मितो भोजराजः ।
विनयनमितमूर्धो - भावुकं स्वस्वसारं ।
सुललितवचसाप्रा - सादयल्लज्ञयेत्थम् ॥

नादुकुरञ्जी - रूपकः ।

उ ॥ अपराधी नूनमहं - हा धिग्मम जीवितम् ।
ध्रु ॥ कृपया मां क्षमतां भोः - केवलमसम्भावितम् । ॥अ॥
१ ॥ इह मुहुस्सुजनमेव - हिंसयति खलः ।
न हि शत्रुः कर्मणावि - ना विशृङ्खलः ।
२ ॥ मरणतो बिभेमि किं - बालवन्मुधा ।
शरणार्थिनि प्रसीद मयि - साधुवाक्सुधा । ॥अ॥

१२८. हन्मि शत्रून् शत्रुणापि हन्येऽहमिति बालकः ।
मन्यते नूनमात्मा तु नहि हन्ति न हन्यते ॥

In Public domain. Digitization Muthulakshmi Research Academy

ग ॥ इत्थमुदित्वा - देवकीवसुदेवयोर्बन्धनानि मोचयित्वा ताभ्यामनुगृहीतः कंसो भद्रसिंहासनमारूढस्सस्सकलमन्त्रिपुङ्गवान्निमन्त्र्य तान्वक्ष्यमाणमभणद्भोभो मन्त्रिणः कोऽपि बालको मद्भ्रातुकः क्वचिद्वर्धत इति योगनिद्रयाहमभाणि - तस्मात्सकलमायाविशारदान्राक्षसान्नानादेशेषु प्रवर्धमानबालकान्निहन्तुं नियोजयन्तामित्याज्ञप्यात्ममरणशङ्कयाहारनिद्राविहारेषु सुखं न विवेद व्रजेऽपि यशोदानन्दयोश्चिरलब्धं दिव्यसुन्दरविग्रहलोकोत्तरतेजश्शालिनं सर्वगोपगोपी-प्रेमास्पदं निजपुत्रकं परिपालयत - स्तत्रान्तरे मायाविनीपूतना नाम राक्षसी कंसप्रेरिता मनोहरवेषयुक्ता - कुचकुम्भ विनिर्गलितपयोविषेण तत्र बहुबालकान्मारयन्ती कस्मिन्नहनि मन्दमन्दं नन्दमन्दिरं प्राप्य - सर्वजनान्सुन्दराकारसल्लापैर्विमोहयन्ती - काञ्चनदोलिकायां खेलन्तं रमाकान्तमुद्धृत्य यावन्निजस्तन्यं पाययितुमारेभे तावदेव मुञ्च मुञ्च रे कपटार्भः किम्मदीयप्राणानपि समाकर्षयसीति वदन्ती ममार - ततः सर्वव्रजवासिनो घोररूपिणीं विगतप्राणां दानवीमपि - तद्विशालोरसीन्द्रनील-ललन्तिकायमानं - प्रफुल्लेन्दीवराक्षं - मन्दस्मिताञ्चितास्यारविन्दं - सानन्दं क्रीडन्तं गोविन्दं दृष्ट्वाद्भुताह्लादचित्ता बभूवुः ॥

१२९. क्रीडन्तमङ्गणे जानुचरं नन्दार्भकं हठात् ।
तृणावर्तासुरश्चक्रवातो भूत्वैकदाहृतः ॥

१३०. अथ नन्दसती हठात्प्रचण्ड । भ्रमिवातापहृतं सुतं विलोक्य ।
स्वशिरोहस्तयुगेन ताडयन्ती । विललापाश्रुझरान्प्रसारयन्ती ॥

यदुकुलकाम्बोजी - त्र्यस्रः ।

उ ॥ किङ्करोमि किं वदामि - कीर्तनीयपुत्र ।
त्वङ्कुतो गतोऽसि स - न्त्यज्य माममुत्र । ॥किम्॥
१ ॥ हाहाधिग्दुर्विधिं कथ - मागतो भ्रमिवातः ।
आहा किं त्वामेवा - हर्षीद्दुर्विनीतः । ॥किम्॥

In Public domain. Digitization Muthulakshmi Research Academy

२ ॥ बालक सत्वरमेहि पि - ब पिब मम स्तन्यम् ।
नालीकायतनेत्र वि - नाशय मे दैन्यम् ॥ ॥किम्॥

१३१. इहैवोपाविक्ष - त्प्रतिफलितजामीफलमसौ ।
जिघत्सन्नाक्रीडी - दिह परिमृशंस्तर्णकतनुम् ।
इहैव व्याभाक्षी - त्सकलसवयेभ्यश्चिपिटकान् ।
शिशुर्मे किं वच्मि - भ्रमिपवनभूतस्तमहृत ॥

ग ॥ इत्थं नानाविधैर्विलपत्सु यशोदाप्रमुखगोपाङ्गनासु ग्रामस्यान्तिकादञ्जनपर्वत इव वज्रविच्छेदितपक्षः कोऽपिराक्षसो विगतासुर्हठात्पपात - तस्योरसि क्रीडन्तमपायरहितं निजतनयं नन्दसती विलोक्याद्भुताह्लादनिमग्ना भवन्ती गाढमाश्लिष्यन्ती तन्मूर्धानमुपजिघ्रन्ती कपोलं परिचुम्बन्ती तं स्तन्यं पाययन्ती नितराममोदिष्ट ।

१३२. यशोदाशिशवे स्तन्यं ददत्यस्सास्यगह्वरे ।
जृम्भया विस्तृतेऽद्राक्षीद्विस्मयेनाखिलं जगत् ॥

मञ्जरी - पूर्वकल्याणी - चतुरश्रः ।

१ ॥ वसुदेवनियोगादेकदा - व्रजमुपजगाम गर्गः ।
प्रसन्नहृदयो ज्योतिश्शास्त्र - प्रवीणस्तुलितभर्गः ।
२ ॥ धरणीदेवाग्रणिं नमस्कृ - त्य तं नन्दो पि जगाद ।
गुरुवरेण्य संस्कुर्वे तौ मम - कुमारौ सत्यवाद ॥

१३३. बलराम इति ज्येष्ठं कनिष्ठं कृष्ण इत्यसौ ।
अन्वर्थकाभ्यां नामभ्यामाचख्यौ धरणीसुरः ॥

ग ॥ कुमारावपि जानुविन्यस्तपाणितलावितस्ततस्सञ्चरन्तौ - गोपाङ्गनांशुक विलग्नकराम्बुजौ क्वचित्परिभ्रमन्तौ - स्वहस्तपरिगृहीतगोवत्सलाङ्गूलाकर्षणे

In Public domain. Digitization Muthulakshmi Research Academy

जम्बालप्रदेशे निपतन्तौ - मातृपयोधरोभयपार्श्वविलोलाङ्गुलिजालैः स्तन्यपानसमये मुहुरुत्पतन्तौ - कोमलकरविन्यासैर्निजाभिलषितं सूचयन्ता वव्यक्तमधुरमालपन्तौ - स्वकीयमुग्धकृत्यैस्सकलमुनिमानसान्यपि प्रनर्तयन्तौ - लीलाताण्डववेलायां समुन्नतोत्तमाङ्गाभ्यां पन्नगाधीशशोभां वहन्ता - वङ्गसम्मृष्टपङ्काङ्ग रागैः कलभावनुकुर्वन्तौ - जननीस्तन्यं निश्शेषं निपीय परमयोगोद्भवामृतपानमत्तयोगिनाविव पारवश्यमाप्नुवन्तौ - तनुसंलग्नधरणी-परागविभूत्याफालाञ्चन्मुक्तालालामबालचन्द्रलेखया ललाटविलसत्कस्तूरी-तिलकतृतीयनेत्रेण ग्रीवाबद्धेन्द्रनीलमणिच्छविनाहारवल्लीफणिहारवल्यापि शिवसारूप्यमुपयान्तौ रेजतुः ॥

१३४. तद्विहरणैः प्रमुदिता ।
व्रजाङ्गनास्तद्विलोकनासक्ताः ।
हन्त बभूवुस्सततं ।
विस्मृत्य गृहेष्ववश्यकार्याणि ॥

१३५. पल्लवगृहनवनीतम् ।
समस्तमाभक्ष्यकैतवेनागत्य ।
देह्यम्बान्नम्म इति ।
प्राहस कृष्णोऽपि निरपराध इव ॥

ग ॥ अनुदिनमपि कृष्णः सञ्चारसम्भाषणदक्षस्सन् गोपकुमारैः सह मिलित्वा यूयङ्गावो वृषभोऽहमिति नमिताङ्गो गर्जन्ननाट - राजाहं भटा यूयमेतैतेत्या-ज्ञापयति स्म - तस्करोऽहं यूयं गृहस्था इति सहचरान् स्वापयित्वा वसून्यपहृत्य तिरोबभूवा - हं सूत्रधारो यूयं बहुरूपा इत्यभिनयति स्म - मुहुरितस्ततस्समुत्पप्लवे - क्वचित्तिरोधानकेलिं ततान - क्वचिड्डोलया डोलयामास - क्वचित्कन्दुकैश्चिक्रीड - क्वचिज्जारचोरवेषैश्चचार - गोपिका अपि तस्य कुमारशेखरस्य कपटचेष्टितैर्बहुशो वञ्चिता यशोदामित्थं जगदुः।

In Public domain. Digitization Muthulakshmi Research Academy

कापी - चतुरश्र ।

उ।। जननि यशोदे शृणु ते सुता - साधुचेष्टितानि ।
ध्रु ।। वनरुहनयनेऽस्माकमत्यार्त - वचनान्येतानि ।
१ ।। प्रसूतिकासु रुदत्सु शिशुभ्यः - पयो नास्तीति बहुधा ।
प्रसह्य वत्सान् मोचयति स्म - प्रहसन् गोभ्यः स वृथा ।
२ ।। कलशसम्पूर्णतप्तपयस्ते - कनिष्ठसुतो निपीय - शेषं सखिभ्यः प्रदाय ।
दलतिस्म सर्वरिक्तभाण्डनि - तन्वङ्गि किं ब्रुवीय । ।।ज।।
३ ।। हन्त शिशुस्ते चोरयितुं म - दालयान्तरं गत्वा ।

मे ।। व्युपरि स्थितघटमीक्षित्वा - धरादुलूखलमयं ।
हित्वा - कलशस्य च्छिद्रं कृत्वा ।
ध्रु ।। शान्तपिपासुर्बहिरायातः - समस्तं पयः पीत्वा ।

१३६. भक्षितशेषंकिञ्चि ।
त्स्नुषाधरेऽलिप्त दधि सुपुत्रस्ते ।
श्वश्रूरताडयत्ता ।
मविवेकात्सुन्दरीदमुचितं किम् ।।

त्र्यस्त्रः ।

उ ।। गृहमपि तासां गत्वा - घृतमखिलंभक्षित्वा ।
मे ।। सहसा भाण्डानि - गेहेऽप्यासां - स जहौ शून्यानि ।
ध्रु ।। अहह घोरकलहोऽभू - दासामेतासाम् ।

१३७. मदन्यःकोऽपि देवोऽस्ति किमित्यब्जाक्षी ते सुतः ।
निरकार्षीद्देवपीठीमुच्छिष्टेन ममालये ।।

In Public domain. Digitization Muthulakshmi Research Academy

उ ॥ नवनीतं सङ्गसन्तं - नवनवनीरदकान्त ।
धु ॥ मवारुद्धबाला मे तनूजं - तवासहनशीला ।
मे ॥ अविशङ्कं स्तनं स त - स्या नखैर्ददाल । ॥ज॥

१३८. किमिति त्वन्नामैषा ।
क्रीडन्तं तं गृहाङ्गणेऽप्राक्षीत् ।
सत्वरमुपेत्य तस्या ।
अधरं संदष्टवान् किमेषोऽल्पः ॥

चतुरस्रः ।

मदीयपुत्रं विलोक्य निद्रा - मत्तं सवयस्कं तस्य - शिरोजांस्तर्णकस्य ।
त्वदात्मजो लाङ्गूले निबध्य - तमपि पशुमतित्रसत स - र्वाञ्जनानजीहसत।
॥ज॥

१३९. भ्रष्टं कन्दुकमिति ते ।
सुतश्छलेनास्मदीयगृहमेत्य ।
स्नानं कुर्वत्याम ।
स्तुत्र्यास्समचूचुरद्धत दुकूलम् ॥

ग ॥ इति बहुधा वदन्तं सकलगोपीसङ्घं समाश्वस्य - निजकुमारमुलूखले यशोदा बबन्द - बालकृष्णोऽपि तमुलूखलं कथञ्चिदपि समाकृष्य यमलार्जनवृक्षान्तरं प्रावेशयति स्म - ततस्तत्तरुयुगलमपि भीकररवेण सहसा प्राभञ्जि - तदात्याश्चर्ययुक्तो नन्दोऽप्यपायरहितमात्मजं बन्धनान्मोचयित्वा सदोपद्रव सङ्कुलितं व्रजं विहाय सकलबान्धवैर्गोभिस्साकं - कालिन्दीजलसम्पूतं सर्वाभीष्टवस्तुसमेतमखिलजनपावनं बृन्दावनं जगाम - कृष्णोऽपि तत्र बकाघगर्दभाद्यखिलामरकण्टकान्निहत्य कुमारवयसि चतुराननसंशोधितानन्य महिमातिशय - एकस्मिन्दिने कालियफणिमपगतदर्पं चकारेति निगदन्तं शुकयोगिनं परिक्षिदित्थमुवाच ॥

In Public domain. Digitization Muthulakshmi Research Academy

१४०. अस्वाद्य नन्दसूनो ।
श्चरितामृतमपि जडः कथं तुष्येत् ।
वद सम्प्रति शुकयोगिन् ।
कालियमर्दनकथां तपोभोगिन् ॥

१४१. तदा वैयासको विष्णुकथाकथनलालसः ।
सौभद्रसूनुं स प्राह । सावधानं परिक्षितम् ॥

झंझाटि - त्र्यस्त्रः ।

उ ॥ शृणु नरेन्द्र मामेक - स्मिन्दिनेहरिर्म - र्दिततदिविषदरिः । ॥शृ॥
ध्रु ॥ रणभीमः कालिन्दी - ह्रदमुपागतः । ॥शृ॥
१ ॥ एकाक्येव भ्रमन्विपि - नेऽकुतोभयः - सुश्रीकरोदयः ।
सोऽकामयत कालियनि - राकरणमतः । ॥शृ॥
२ ॥ स्फीतकदम्बावनिरुह - शिखरमाश्रितः प्रे - क्षितदृढव्रतः ।
शीतलगम्भीराम्भ - श्शीघ्रमुपगतः । ॥शृ॥

१४२. कृष्णस्य लङ्घनोत्पातवेगेन ह्रद एधितः ।
सद्यश्शतधनुर्मात्रं कालियोऽपीत्थमौहत ॥

१४३. बालः कोऽपि ह्रदम्मेऽ ।
क्षोभीदविशङ्कमेव निर्भीतः ।
इति मत्वा द्राक्कृष्णं ।
दष्ट्वा गाढं बबन्ध भोगेन ॥

ग ॥ ततःकृष्णमनुसृत्य सञ्चरन्तोऽपिगोपास्तत्सरोवरोपकण्ठमुपेत्य - चेष्टारहितमिव स्थितं - भोगिभोगपरिवेष्ठितं - प्राणसखं विलोक्य - हा हन्त विलोकय तत्क्रूरभुजङ्गमः कृष्णं सन्दश्य निजभोगेनाभान्त्सीत्किंकुर्म इत्यार्तास्तीरे

In Public domain. Digitization Muthulakshmi Research Academy

विललापु - र्गोसमूहोऽप्यश्रूणि विमुञ्चन्नाहारं विसृज्य समुन्नमितमस्तको निश्चेष्टितो बभूव - तत्रान्तरे बहुशो दुर्निमित्तानि व्रजे वीक्ष्य नन्दयशोदादिबृन्द-निवासिनः कृष्णदिदृक्षयेतस्ततः परिभ्रमन्तो गोविन्दपादचिह्नान्यनुसृत्य कान्तारं प्राविविशु - र्बलरामोऽपि विज्ञातहरिप्रभावस्तान्न निवारयामास - तेऽपि कालिन्दीह्रदे तथाभूतं वासुदेवं समालोक्येत्थं चक्रन्दुः ॥

त्र्यस्रः - पुन्नागवरालिः ।

उ ॥ हाहाहा प्रियपुत्रक किमिदं - त्वामवितुं को मार्गः कृतविपदम् ।
ध्रु ॥ आहो पूतनाविषहारिन् व्या - लाधीनोऽसि सदुपकारिन् । ॥हा॥
१ ॥ हन्त त्वामदशत्किं नागः स - न्त्यज्यास्मान्क्रूराशीः पूगः ।
त्वं तु समर्थो नः पातुं व - त्स त्वां शक्नुमो न त्रातुम् । ॥हा॥

१४४. वचनमपि न - श्श्रोत्रानन्दं - वदेत्क इतःपरम् ।
शुभकरकरां - भोजेनास्मां - स्पृशेत्क इतःपरम् ।
नयनसुभगा - कृत्याघोषे - चरेत्क इतःपरम् ।
प्रियतनय किं - कुर्मो जीव - च्छवोपमिता वयम् ॥

ग ॥ इत्थं रोरुद्यमाना नन्दयशोदादिव्रजजना जीवनाशां परित्यज्य परस्परमाश्लिष्या-गाधह्रदे मर्तुमुद्युक्ता बभूवु - स्तदा भगवान् बलदेवस्तान्विलोक्याब्रवीद्धैर्य मवलम्ब्य पश्यतां भाविशुभमिति - कृष्णोऽपि शोकाग्निदन्दह्यमानानात्मीय-जनान्प्राकृत इव मुहूर्तमात्रं विलोकयन्निजदेहं प्रवर्धयामास - ततः कालियस्सन्तप्तायतभोगो दीर्घं निश्वस्य दंशनानि समापय्य कृष्णं विहाय प्रणतफणो धूमकाष्ठ इव दूरे विश्रान्तो बभूव॥

१४५. एकेन हस्तेन गलं गृहीत्वा । सम्भ्रामयंश्चक्रमिवान्तरिक्षे ।
तं पातयामास निरस्तदर्पं । सर्पं कुमारो भुवनैकवीरः ॥

In Public domain. Digitization Muthulakshmi Research Academy

धनश्रीः - चतुरश्रः ।

उ ॥ कालियफणिफणामण्टपे प - ङ्कजलोचनो ननाट ।
ध्रु ॥ कालिन्दीकल्लोलघोषे - घनमृदङ्गनादोपमेव नाट । ॥का॥
१ ॥ सललिताब्जचरचञ्चरीक नि - स्वन इव गायकताने ।
विलसति मञ्जुलहंसकूजिते - विततकांश्यतालरवसमाने ॥ ॥का॥

ग ॥ ततो हरिचरणप्रहारैर्विदलितफणामण्डलं म्रियन्तं कान्तं विलोक्य दुरन्त-चिन्तासन्तापितस्वान्ता नागकान्ताः स्रस्तकचभराः प्रचलितभूषाणाः कुचभाराकम्पितावलग्ना मुहुर्गलितांशुका बालावलिं पुरस्कृत्य कृष्णं प्रणम्य निटलतटघटितकरकमलपुटा इत्थमूचुः ॥

नीलाम्बरिः - त्रिपुटः ।

उ ॥ पतिभिक्षां देहि श्रीविभो स - र्वजगत्प्रभो ।
ध्रु ॥ सततपन्नगशयालो ईश दयालो । ॥प॥
१ ॥ अवतरसि दुष्टान्नि - हन्तुं शिष्टान् सम्मन्तुम् ।
भववारिनिधिवहित्र र - माकलत्र । ॥प॥
२ ॥ पूर्वजन्मन्यकार्षीत्किं - पुण्यं फणिरेषोऽगण्यम् ।
शर्वार्चितं तव पदं - समुवाह मोक्षदम् । ॥प॥

१४६. नाकाङ्क्षति त्रिदिवराज्यरमाधिपत्यम् ।
नो वाञ्छति प्रकटिताष्टविभूतिसिद्धिम् ।
नैवेच्छति प्रथितमोक्षपदं कदापि ।
त्वत्पादभक्त्यमृतपानरतिर्मुकुन्द ॥

१४७. अस्मानुद्वाहयास्माकमवित्वा जीवितेश्वरम् ।
कल्याणं त्वत्कृतं नित्यं को विवाहः पुरातनः ॥

In Public domain. Digitization Muthulakshmi Research Academy

ग ॥ इत्थं प्रार्थयत्सु कालियाङ्गनासु करुणासमुद्रश्शरणागतवत्सलः पुण्डरीकाक्षश्च-रणघट्टनेभ्यो विरराम - भुजङ्गपतिरपि पुनर्लब्धचेतनोऽञ्जलिं बध्वा कृष्णं विज्ञापयामास॥

तोडिः - रूपकः ।

उ ॥ भद्रं कृतमीश्वर त्वया स - त्पालनोदय ।
ध्रु ॥ क्षुद्रं मां प्रपुनीते - शुंभत्पादाब्जं ते । ॥भ॥
१ ॥ मत्प्रवर्तनं कुटिलं - मन्मुखमपि विषजटिलम् ।
सत्प्रमादकरं मां - शासित्वा किन्तमाम् । ॥भ॥

१४८. इत्थं स्तुवन्तं नागेन्द्रं सदयो हरिरब्रवीत् ।
वस त्वं वार्निधौ तार्क्ष्यभीतिस्ते मास्त्वितःपरम् ॥

ग ॥ ततः कालिये सपरिवारेंऽबुधिं गते - नागाङ्गनादत्तदिव्याम्बराभरणभूषितं - कालिन्दीह्रदोत्तीर्णं सुतं - परिष्वज्य साद्भुताह्लादौ यशोदानन्दौ सुख्यतः स्म - कृष्णोऽपि दावाग्निपानगोवर्धनोद्धरणाद्य - मानुषचेष्टितैस्सकल बृन्दावनवासिनः स्वमहिमानं दर्शयन्दिनदिनप्रवर्धमाननिजतारुण्येन सर्वगोपाङ्गनामानसान्यपहरन् गोपिकावस्त्रापहरणादिचमत्कारलीलाः प्रकटयन्नेकस्मिन्दिने कान्तारमध्ये मध्यन्दि नातपसन्तप्तगोव्रजं शीतलेक्षुच्छायं विनीयान्नबुभुक्षुः समीपे यज्ञमाचरन्तं ब्राह्मण्यमन्नंभिक्षयेति सहचरं प्रेषितवांस्तेपि यायजूका वासुदेव सहचरमित्थमूचुः ॥

खरहरप्रिया - चतुरश्रः ।

उ ॥ याहि याहि मूढ ना - स्त्यन्नं शूद्राय लाघवेन ।
ध्रु ॥ आहो कः सम्प्रयच्छते - हन्त पुरोडाशं शुनकेन । ॥या॥
१ ॥ किं सूर्याचन्द्रमसौ बल - कृष्णौ किम्वग्रामरुतौ ।
शंसितौ त्वादृग्गोपालौ - सत्वरमपसरतौ रङ्गरतौ । ॥या॥

In Public domain. Digitization Muthulakshmi Research Academy

१४९. सहचरकथितोदन्तं ।
श्रुत्वा कृष्णो विहस्य मृष्टान्नम् ।
दास्यन्ति द्विजवनिता ।
इति सहसाप्रेषयत्पुनर्भृत्यम् ।।

१५०. कृष्णस्य भृत्यः सङ्गत्य यज्ञवाटीं कृताञ्जलिः ।
नित्यसम्पूतमह्नाय प्राहेत्थं ब्राह्मणीसभम् ।।

नवरोजुः - त्र्यस्रः ।

उ ।। अत्र वने स्थितवान् वनमाली - मुरलीवादनशाली ।
ध्रु ।। तत्रभवान् गोवर्धनधर्ता - कालियगर्वापहर्ता । ।।अ।।
१ ।। अन्नबुभुक्षुर्नन्दकुमारः - कोटिमन्मथाकारः ।
सन्नुतभक्तमनोऽभीष्टदाता - कपटनाटकरङ्गनेता । ।।अ।।
२ ।। भिक्षतेऽन्नं नित्यसन्तोषो - लीलामानुषवेषो ।
अक्षतगोपालिकाचित्तचोरः - संसाराम्बुधिकर्णधारः । ।।अ।।

१५१. सततटिदभिनवाभ्र - श्यामलः पीतवासाः ।
परिचलदवतंसी - भूततापिञ्छगुच्छः ।
प्रमुदितपरिवारः - सर्वलोकैकवीरः ।
समभिलषति भोक्तुं - त्वत्प्रसादं मुकुन्दः ।।

ग ।। ततो मुनिकान्ता अपि सन्तोषपरवशीकृतस्वान्ताः - कृष्णसन्दर्शनोत्सुका मुहुर्मुहुस्स्रस्तांशुकाः - पुलकितसर्वाङ्गाः सम्मोदबाष्पप्लुतापाङ्गाः - संभ्रमविगलितधम्मिलबन्धा विस्मृताखिलसंसारगन्धाः - शश्वत्कम्पितावलग्नाः सद्भक्तिनिमग्नाः - स्खलितयानावर्धमाननन्दनन्दनसुन्दरपादारविन्दध्यानाः - पवित्रवस्त्रालङ्कृता वासुदेववर्णनावशङ्कृताः - सहसा मामामेति भर्त्सयतः पतिपुत्रादिप्राणबन्धूनपि निराकृत्य विविधमृष्टान्नानि स्वच्छपात्रेषु सञ्चित्य

Public domain. Digitization Muthulakshmi Research Academy

- मार्गस्थाल्पशिलाकण्टकानि पुष्पाणीव - प्रचण्डमध्याह्नातपं ज्योत्स्नामिव - वासुदेवसहचरमात्मबन्धुमिव मन्यमानाः - संश्रितानन्दकन्दम्मुकुन्द-मालोक्येत्थम्प्रस्तुवन्ति स्म ॥

श्रीः - मिश्रः ।

उ ॥ जयजयकारुण्यसिन्धो कृष्ण - जयजयसंश्रितबन्धो विगततृष्ण ।
ध्रु ॥ जयजयवागीशाद्यमरविनुतपाद - जयजयजयनित्यलक्ष्मीविनोद । ॥ज॥
१ ॥ बालदुर्वादलश्यामकृष्ण - फालाञ्चितदिव्यमुक्ताललाम ।
नालीकनेत्रसम्पूर्णचन्द्रवक्त्र - नन्दकुमाराभिनवमन्मथाकार । ॥ज॥

१५२. क्षुधार्तवन्नोऽर्थयसेऽन्नमत्थिम् ।
छलेन सद्भक्तिपरीक्षणार्थम् ।
अन्नस्वरूपोऽप्यखिलेश्वरोऽपि ।
त्वमात्मतृप्तोऽपि मुकुन्द चित्रम् ॥

१५३. मा मामेति निवारिता अपि वयं - भ्रात्रादिभिर्बान्धवै ।
स्त्वत्पादाम्बुरुहद्वयार्चनरता - इत्थं प्रभो स्वागताः ।
कृत्वालं निरतप्रमादकलितं - गार्हस्थ्यमाहो भव ।
त्कैङ्कर्यैकपरास्तवानवरतं - भक्ता हरेऽस्मानव ॥

१५४. गुणवान्मूर्तिमान्मर्त्य इति त्वामिह मन्यते ।
मूढधीः किन्तु साक्षात्त्वं परब्रह्मैव केवलम् ॥

ग ॥ इति स्तुवन्तं मुनिपत्नीसभं - भगवान्वासुदेवोऽपीत्थमुवाच - भोभोस्साध्वी निकुरम्ब - यथार्थप्रतिपादितैर्वेदान्तसारभूतैस्त्वदीयालापैस्सम्प्रीतोऽस्मि - कुलाङ्गनानां पतिशुश्रूषैव परमधर्मः - साधुकृतं तु मत्सन्दर्शनेन निश्रेयसदाय-केन - मदीयपादाब्जचिन्तैव कैवल्याय कल्पते - मामकदर्शनेन विध्वस्ताखिल-

In Public domain. Digitization Muthulakshmi Research Academy

कर्मबन्धं सन्ततानवद्यं त्रैलोक्यसम्पूतं भवच्चरित्रं विज्ञाय त्वद्बन्धुबृन्दमपि नितरां सन्तुष्यत्येवेत्थं वदन्तं भगवन्तं प्रणम्य ततो मुनिपत्नीमण्डलं निवर्तयामास-मुनयोऽपि स्वमौढ्यं प्रणिन्दन्तो भगवद्दर्शनेन प्रसन्नमुखकमलाः स्त्रीः प्रशशंसु - र्हरिरपि नानाविधक्रीडाभिर्गोपसुन्दरीरनुदिनं समुल्लासयंश्च चारेति निगदन्तं शुकमहर्षिणं परिक्षिद्वक्ष्यमाणं पप्रच्छ ।

१५५. सर्वधर्मस्थापनाय यदि भूमाववातरत् ।
विष्णुः कथं ब्रूहि मुने परनारीरतोऽभवत् ॥

ग ॥ शुकमुनीन्द्रोऽप्यवदच्छृणु नरेन्द्रचन्द्र - निखिलपदार्थान्भक्षयन्नपि सर्वभक्षको यथा दोषैर्न लिप्यते तेजस्विनस्तथा वासवचन्द्रादय इव दुष्टा न भवन्ति - किञ्चानीश्वरः कथं विजयेत परनारीसङ्गममभिलष्य - गौरीश्वरं विना कोऽन्यो हालाहलं पिबेत् - किन्तु प्रभूणां वचनमवितथमेव भवत्यार्या स्तु तद्वचनमनुल्लङ्घ्य सञ्चरन्ति - किन्तु ते प्रभुचरितं सत्यासत्यमिति निश्चित्य तन्नानुसरन्ति - तर्हि मुनीन्द्रास्तु यत्पादपङ्कजपरागध्यानसम्प्राप्तयोग-निरूढत्वेन विगलिताखिलकर्मबन्धा यथेष्टं विहरन्ति स प्रभुर्नित्यशोभनो यथा तथा करोतु तस्य किं नाम भवबन्धनानि - गोपेषु गोपिकास्वपि सर्वजन्तुषु सञ्चरतस्तन्महात्मनः काः पराङ्गनाजगन्मयस्तथाकरोल्लीला-मानुषविग्रहोऽथ किं श्रूयतामुत्तरकथा ॥

१५६. कंसोऽपि देवमुनिना कथितं बलकृष्णयोः ।
निशम्य बृन्दवृत्तान्तमक्रूरमिदमब्रवीत् ॥

अठाणः - रूपकः ।

उ ॥ अक्रूरनिर्वक्रगुणम - दात्ममित्र ।
द्रु ॥ सन्ततकल्मषविरहित । ॥अ॥

Public domain. Digitization Muthulakshmi Research Academy

ध्रु ॥ चक्री व्रजे मद्विद्विडस्ति ।
द्रु ॥ सत्वरमानय तं हित । ॥अ॥
१ ॥ वसुदेवसुतौ बलकृष्णौ मम - वैरिणौ ।
द्रु ॥ नन्दागारे स्तस्तौ ।
असमानबाहुगर्वयुता ।
द्रु ॥ वहहसितासितावत्रस्तौ । ॥अ॥

१५७. आह्वय स्वधनुर्यागं वीक्षितुं बलकेशवौ ।
कथञ्चिदपि तौ हत्वा सुखिष्यामि प्रियङ्कर ॥

१५८. दनुजारिरवातरद्धरण्याम् ।
सुरसम्प्रार्थनयाधुना मुकुन्दः ।
व्रज आसस मां निहन्तुकामः ।
प्रहणिष्यामि तमीदृच्छलेन ॥

१५९. आज्ञापितोऽक्रूर इति व्रजन्व्रजमुदारधीः ।
कृष्णं दिदृक्षुस्सर्वेशं सपदीत्थं व्यतर्कयत् ॥

बेगाड - रूपकः ।

उ ॥ धन्योऽहं धन्योऽहं - धन्योऽहमतीव ।
ध्रु ॥ धन्योहं गोविन्दं - द्रक्ष्यामि सुकृतीव । ॥ध॥
१ ॥ यन्ध्यात्वा सूरयो भ - वाम्बुनिधिं तेरुः ।
सन्ध्यायामीक्षिष्यते - समयाखिल कारुः ॥ ॥ध॥
२ ॥ ईदृशच्छलेनापि - प्रेषितवान्मां सः ।
मेदिन्याम्मम केवल - मित्रमेव कंसः ॥ ॥ध॥
३ ॥ पश्येत्किं शत्रुतया - परमवैरिदूतंम् ।
शश्यादुत मां सर्व - ज्ञः सद्भक्त्यूतम् ॥ ॥ध॥

In Public domain. Digitization Muthulakshmi Research Academy

१६०. अलकभ्राजितमिन्दुबिम्बसदृशं - हासप्रभोद्दाममु ।
ज्ज्वलपद्माक्षममूल्यकुण्डलल्लस - द्गण्डं तदीयाननम् ।
किं द्रष्टुं प्रभवाणि सम्प्रति शुभ - म्मे सूचयन्तः खगाः ।
सव्यं यान्ति मृगा अपि श्रितजन - क्षेमङ्करश्श्रीपतिः ॥

१६१. त्रियामायामस्यां - व्रजमुपगतं मां प्रणमितं ।
करेणोद्धृत्य द्रा - क्सुजनवरदेनाम्बुजरुचा ।
जगन्नाथो मन्द - स्मितललितवक्त्रो मधुरिपु ।
र्न किं मे दद्यात्स - म्मदमभयमार्तावनपरः ॥

ग ॥ इत्यक्रूरोऽनेकसङ्कल्पोपेतस्सन् - घनचन्दनकुन्दकुटजतालसालकुरुवक वटमाकन्दं नन्दितबलगोविन्दं विकचारुणारविन्दं बृन्दं प्रविश्य - तस्मिं स्तिष्ठद्‌ु विपिनविलसितस्वादुतृणग्रसनपारवश्यविलम्बितगमनान्वित द्विहायिन्युपसर्यानाथ हं चयान्वेषणत्वरया निम्नोन्नतस्थलान्यविशङ्कं धावतारि गोपकानामाह्वानशब्दानाकर्णयन्- कोमलघासखादनकुतूहलस्खलित गमनानामपि गोष्ठस्थवत्ससंस्मरणाद्धावनवेगदीर्घीकृताङ्गानामम्भारवयुतानां धेनूनासङ्गादपसरंस्तर्णकधरान्नवसूतिकानुगम्यमानान्दामहस्तान्वल्लपान्मन्द-मन्दमालोकयन् - व्रजोभयपार्श्वयोः कलङ्करहितान्व्याघ्रादिदुष्टसत्वनिवारणपटून्-कुठारकुन्तशरासनप्रमुखायुधहस्तानप्रमत्तान्ग्रामरक्षकानतिक्रम्य - नानाविध-सरसतृणास्वादनगरिष्ठाभिः प्रविष्टगोष्ठाभी - रोमन्थलीलालसाभिर्धे-नुभिरभीष्टगोसङ्गमरभसप्रभूतपरस्परयुद्धसमयनिनादितचटुलविषाण-कोटिभिर्वृषभै - रकुण्ठितबलत्रुटितकण्ठरज्जुभिरापीयमानमातृपयोधरैर्वत्सतरै - स्साहाय्यार्थिगोपकुमारकाह्वानशब्दै - रञ्चितभर्तृपुत्रश्वशुरदेवराभिः पञ्चायुधभल्लभग्नहृदयाभिर्विस्मृतगृहकृत्याभिस्सङ्केतस्थलकृष्णागमन-तत्पराभिर्गोपकामिनीभि - र्धेनुदोहनवेलाविकीर्णपयोबिन्दुसन्दोहपरम्परा-सम्पादितपङ्कै - र्दोहनसमयगोपकराकृष्टक्षीरनिनादितकलशै - र्महोक्षकण्ठसंस्पर्शनस्निग्धमन्दिरद्वारदारुस्तम्भप्रान्तनूतनजनविलोक

In Public domain. Digitization Muthulakshmi Research Academy

नकुपितसारमेयभयङ्करारावैर्विराजितं - बलकृष्णबाहुदण्डप्राकार रक्षाविशेषभूषितं घोषं प्रविश्य - तस्मिञलजाङ्कुशादिरेखान्वितां हरिचरणपद्धतिं समीक्ष्य - प्रचुरसम्मदरोमाञ्चः सन्तोषबाष्पप्लुताक्षो रथमवतरन् - पद्मनेत्रौ रङ्गद्गात्रौ - धेनुदोहनवाटीगतावलङ्कृता - वुद्यद्गाभासितौ नीलपीतनवीनोज्ज्वलवासितौ - कुसुममालाञ्चिताकारौ धीरौ - कामुकीमारौ - रामकृष्णावीक्ष्य - पुलकितसर्वाङ्गस्सन्तोषाश्रुसम्पूर्णापाङ्गो भूत्वा प्रणनाम - तमपि चक्राङ्कितहस्तेनोद्धृत्य भक्तवत्सलः केशवस्समाश्लिष्यादरेण गां दत्वा भोजयित्वा पल्यङ्के समुपवेश्येत्थं बभाण॥

केदारगौडः - चतुरश्रजातिरूपकः

उ ॥ कुशलं ते किं सुहृदां - शोभनम् ॥

ध्रु ॥ सदमलमृदुलहृदय वद ॥

ध्रु ॥ वशगाः किं प्रजाविभोः सन्ततकाङ्क्षितसत्पद ॥ ॥कु॥

१ ॥ वसुदेवदेवक्यौ म - त्प्रभवप्याजनिबद्धौ ।
बन्धनालये घोरे प्राणानलोपेतौ किं ज्ञानसमृद्धौ । ॥कु॥

१६२. निशम्य त्वद्वृन्दा - वनगमनवार्तां विमनसौ ।
त्वया वक्तां किं तौ - रहसि कथितव्यं कथय माम् ।
सविज्ञायोदन्तं - मम किमपि बाष्पप्लुतदृशौ ।
कथम्भूतावास्ता - महह पितरौ मे प्रियतमौ ॥

कापिः - मञ्जरी - चतुरश्रः

१ ॥ वद किमर्थमागतो भवानिति - वदन्तमथ लोकेशम् ।
तदा जगादाक्रूरो नारदकथनं कंससकाशम् ।

२ ॥ वैरकारणं कंसकृतं तं - वधोद्यमं देवक्याः ।
वीरयागच्छलेनाह्वानं - विहस्य हरिः सदेक्यः ।

In Public domain. Digitization Muthulakshmi Research Academy

३ ॥ नन्दादिगोपबृन्दमवेक्ष्या - नन्दसहितोंऽबुजाक्षः ।
सुन्दोपसुन्दनाशकोऽवद - त्सुष्ठु पातकविपक्षः ॥

१६३. भूनाथो मखमीक्षितुं सपदि नः - कंसः समाज्ञप्तवान् ।
गोक्षीरप्रभृतिप्रदेशनचयः - सञ्चीयतां सत्वरम् ।
यानान्यानयत प्रभातसमये - सन्नद्धभद्राण्यलं ।
संलापैः सहसा भवाम मधुरा - यात्राभिमुख्यं वयम् ॥

१६४. अक्रूरो नयति श्रीशं मधुरामिति गोपिकाः ।
शृण्वन्त्योऽन्योऽन्यमित्थं ताः प्रेमबद्धा बभाषिरे ॥

बेहाग् - मिश्रः ।

उ ॥ ब्रह्मा गृहस्थाग्रेसर - इति - बाढं विश्वसिमो वयं सदा ।
ध्रु ॥ जिह्मप्रचारः स एवाधुना - श्रीपतिमपि सञ्चलयतीतो मुदा ।
१ ॥ हरिहरिचतुरास्यः पुमान्नून - मस्मानतः क्लेशितवान्कठिनहृदयः ।
करुणालवाला सरस्वती नः - कष्टं वदामस्तां कालोऽप्यदयः ॥॥ब्र॥
२ ॥ हरिमन्दहासं हरेर्वचश्श्री - हरिहस्तालम्बनमाह्वानमुत ।
हरिरहः क्रीडामितःपरं श्री - हरिसङ्गतिं कथं विस्मरामो बत ।

१६५. आहूतो नगरं प्रयाति सहसा - बालाः कथम्मे स्मरात् ।
तिष्ठन्ते विरहान्ममाद्य नितरां - दुःखन्त्यमू इत्यसौ ।
गोविन्दो नहि मन्यतेऽतिजरठा - गोप्यः प्रयाणं हरे ।
स्ता हन्त प्रतिषेधयन्ति न पुनः - किं कर्तुमीशामहे ॥

१६६. स्वस्मै हित्वा क्रूरनाम चक्रिं दूरं नयत्यसौ ।
यद्यक्रूरो न गच्छेत्किं त्यक्त्वास्मत्प्रियवल्लभम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

आनन्दभैरवी - त्रिपुटः ।

उ ॥ कुटिलात्मा विरहाग्नौ पातयति - घोषाङ्गना एवार्तिं प्रापय्य ।
ध्रु ॥ पुटभेदनस्त्रीणामपरिचितानां - पुरुषोत्तमसाङ्गत्यं विरचय्य ॥
१ ॥ पुरयोषितः सम्फुल्लाम्बुजेक्षणाः - पूर्णसुधाकरास्याः ।
करधृतलाजाः सौधाग्रस्थाः कामयेत हरिरतिप्रशस्याः ॥ ॥कु॥
२ ॥ नगराङ्गनालोकनैः सरसालापै - र्नर्मभोगैर्मोहितः ।
नगधरो हरिहरिनिरस्यत्यस्मान् - नरवरः खलु नूतनप्रियानिरतः ॥

१६७. मा नैषीर्दूरममुमित्यक्रूरं प्रार्थयामहे ।
हारिमासयते हैवेत्यर्चयामाद्य देवताः ॥

१६८. भवेम हरिपादाब्ज - युगलीनिगलीकृताः ।
कन्दर्पज्वरविभ्रान्ता गोपिका इत्यचिन्तयन् ॥

१६९. बाला वीकीर्णचिकुरा विवशाः कपोल ।
विन्यस्तहस्तकमलास्त्रपयाविहीनाः ।
स्रस्तांशुकाः पवनधूतलताभदेहा ।
अस्मानवाब्जनयनेत्यरुदन् सुगीतैः ॥

बिलहरिः - मञ्जरी - चतुरश्रः ।

१ ॥ प्रातरात्मना सह गतव्यथाः - प्रयाणोन्मुखा बाला ।
दूतिकाभिर्हरिर्न्यवीवृत - तूर्णं विरहविलोलाः ।
२ ॥ चक्री सह रामेणारुरोह - शकटं नन्दानुगतम् ।
सोऽक्रूरचोदितमभीष्टवस्तु - सुभगं दिविषद्विनुतम् ।
३ ॥ मधुराभिमुखं व्रजन्तं वीक्ष्य - माधवं गोपकान्ताः ।
विधिं विनिन्दन्त्योऽभाषयन्त - विस्तृतविरहाक्रान्ताः ॥

In Public domain. Digitization Muthulakshmi Research Academy

१७०. पश्य प्रियस्स एव ।
व्रजति तदा नोऽपि वैजयन्ती सा ।
घोटकपादरजस्त ।
द्विक्सास्मच्चित्तहारिणी - धिग्दैवम् ॥

ग ॥ बलभद्रकृष्णावपि गत्वा गत्वा - प्रविमलकल्लोलपवनभासितजन्यामवसन्नपापसैन्याङ्घ्रिविजनमन्यां कलिन्दकन्यां धन्यामीक्षित्वा - तस्यां परिक्षुण्णमणिगणसमुज्वलं जलं पीत्वा - तरुषण्डसमीपे रथमुपविवेशतु - रथाक्रूरोऽपि तौ नत्वा तदाज्ञया कालिन्दीह्रदं - प्रविश्य यथाविधि वेदमन्त्रान्जपन्स्नात्वा स्नात्वा - तच्छीतलनदीनीरे रामकृष्णौ वीक्ष्य - रथमध्यस्थौ कदा सरिदन्तरं प्रविष्टाविति विचिन्त्योत्थाय भक्तमनोरथस्थौ रथस्थौ पुनर्लक्षित्वा - तीव विस्मित्य - पुरा पश्यंस्यन्दनेऽधुना जले - कल्याणचारित्रावेतावुभयपार्श्वयोरीक्षितावेतदत्याश्चर्यमिति तर्कयन् - पुनरपि तोयमग्नाङ्गो भूत्वा - पोषितपान्थवो यदुपुङ्गवः - सद्भाषं सहस्रमस्तकविभूषं भूमिभृद्वेषं कृपाभिलाषं प्रतिवीरचमूविजगीषं नित्यसन्तोषं निर्दलितरोषमनेक विशेषं शेषमालोक्य - तद्भोगिभोगपर्यङ्कविलसितं - पीतवाससं - मेघविराजद्विद्युतेव वक्षोविभासुरश्रियोपेतं - भ्रमरमुखरितमुखचतुष्क तनयविलसन्नाभीपङ्कजं - बहुपदक्रमविशेषरवाञ्चन्नूपुरं - जलजगर्भरुद्र-सनकसनन्दनसद्द्विजामरप्रशस्यमानचतुरं - सौन्दर्यखनिं - कमपि पुरुषवर्यं - चारुलक्षणलक्षितनखपादगुल्फजानुजङ्घोरुजघनगभीरनाभिमध्योदरं सादरं - श्रीवत्सकौस्तुभवनमालिकाविराजितविशालवक्षोदक्षं पुण्डरीकाक्षं - शङ्खचक्रगदापद्महस्तं - सत्वगुणप्रशस्तं - ब्रह्मसूत्रकटिसूत्रहारकेयूरकटक-कङ्कणमकरकुण्डलकिरीटादिविभूषणं परमभागवतपोषणं - सुन्दरकपोल-फालनासाधरवदनकर्णं नीलनीरदवर्णं - कम्बुकन्धरं करुणापाङ्गबन्धुरं प्रह्लादनारदसुनन्दसनन्दप्रमुखभक्तसम्भावितं - श्रीपुष्टितुष्टिकान्तीलोर्जा-विद्यामायाशक्त्यादिसेवित - मनश्चरं परमेश्वरं प्रणम्य भक्तिसम्भ्रमान्वितो गद्गदकण्ठोऽञ्जलिं बध्वा वक्ष्यमाणं प्रतुष्टाव ॥

In Public domain. Digitization Muthulakshmi Research Academy

तोडिः - सङ्कीर्णजाति त्रिपुटः ।

उ ॥ कृपया मां पश्य लक्ष्मीपते नमो नमस्ते ।
ध्रु ॥ अपारमहिमावतार संश्रितावनसुप्रशस्ते ॥ ॥कृ॥
१ ॥ सुतमित्रवनितागारादिसुखभोगान्स्वप्नाभान् ।
सततं मृगतृष्णासदृशान्काङ्क्षाम्यनर्थलाभान् ॥ ॥कृ॥
२ ॥ खिन्नताम्मे विनाशय प्रसन्नो भवादिदेव ।
पन्नगाधीश वृथातत्वज्ञोऽहं महानुभाव ॥ ॥कृ॥

१७१. जानामि शास्त्रतः - सर्वदा सर्वथा - सत्यं त्वमित्यपि - जगदसदिति ।
सारहित एव - संसार इति मम-व्यर्थमेवाखिल - पौरुषमिति ।
मामकजीवितं - परवशं दुःखभू -यिष्ठं सुखाभास : मित्यतीव ।
तृष्णा न शाम्यती - ति निरन्तरं विवि - धारिवर्गनिपीडितोऽभवमिति ।

कामये तुच्छसुखमैहि - कं तथापि ।
बाधते मामहंमतिः - प्रसभमद्य ।
किंङ्करोऽहं तव प्रभो - किङ्करोमि ।
हेजगन्नाथ संश्रित - हृद्विबोध ॥

१७२. यमुनाजलतश्चक्री बभूवान्तर्हितस्तदा ।
आगच्छन्तं विस्मितं तमक्रूरं हरिरब्रवीत् ॥

१७३. नातिदूरं तोयमस्ति किमालस्यं कृतं त्वया ।
अभूतपूर्वमाश्चर्यं वद किं तत्र विद्यते ॥

१७४. इत्युक्तवन्तं गोविन्दमक्रूरः प्रत्यभाषत ।
लोकातीताश्चर्यकरस्त्वमेव पुरुषोत्तम ॥

गद्यम् ॥ इत्थं वदन्नक्रूरो मधुरासमीपं रथं निनाय - कृष्णोऽपि तं प्रथमतः पुरं स्यन्दनेन सह गन्तुमाज्ञापयामास - तदाक्रूरोऽप्यभणदद्यैव गम्यतां भवता

In Public domain. Digitization Muthulakshmi Research Academy

हन्त यथा भवदङ्घ्रिसरोजरेणुभिस्सम्पूतं भविष्यति मम सदनं त्वद्दासं मामीदृक्प्रकारेण सम्मानयेति प्रार्थयन्तं भागवतोत्तममुवाच माधवश्शृणु साधो यदुकुलविद्वेषिणं कंसं मर्दयित्वा त्वदालयं वीक्षिष्ये गच्छेति ब्रुवन्तं मधुसूदनं प्रणम्य कंससम्मुखं गत्वाक्रूरो बलकृष्णागमनं न्यवेदयत्ततोऽपराह्णे बलभद्रगोपालसहितो माधवः पुरं प्राविविशत् ।

१७५. तपःफलं नन्दयशोदयोश्श्री निकेतनं योगिमनःप्रदीपः ।
गोपाङ्गनासञ्चितपुण्यसिद्धिरायाति लोकामहिनेत्रपर्व ॥

ग ॥ इत्थं वदन्त्यः पौरसुन्दर्यो गोविन्दसन्दर्शनकुतूहलेन परस्पराहूयमाना भुञ्जाना अपि भोजनभाजनानि विनिक्षिप्य - शयाना अपि समुत्थायाभ्यञ्जमाना अप्यस्नात्वा - गुरुशिष्यमाणा अप्यभीत्वा - गृहकार्यप्रवर्तमाना अप्यभ्रमित्वा - रमणरममाणा अप्यरमित्वा - शिशुबिभ्राणा अप्यधूत्वा - समलङ्कुर्वाणा अप्यन्योऽन्यवस्त्राभरणमाल्यानुलेपनानि धृत्वा - हाटकमणिघटिततुङ्गहर्म्याग्रेषु सङ्घीभूत्वा परस्परं वक्ष्यमाणमूचुः॥

खरहरप्रिया - रूपकः ।

उ ॥ सैष किं स्तन्यं निपीय - पूतनां जघान बालः ।
ध्रु ॥ सैष किं जगदलूलुक - न्मात्रे श्रितानुकूलः । ॥से॥
१ ॥ सैष किं नवनीतचोरः - क्रूरदैत्यमदविदारः ।
सैष किं नन्दकुमारः कोटिमन्मथाकारः ॥ ।से॥

१७६. अद्य जाता सहास्माभिः सम्पूता मधुरापुरी ।
साक्षादीक्षामहे कृष्णं लीलामानुषविग्रहम् ॥

ग ॥ इत्थं नानाप्रकारैरन्योऽन्यमालपन्त्यः पौरकान्ताः कृष्णरूपं नेत्रैराकृष्य हृदयेषु संस्थाप्य प्रचुरसम्मदाः पुष्पाण्यकिरन् - विप्रा अपि विविधगन्धप्रसूनैः

In Public domain. Digitization Muthulakshmi Research Academy

देवतासार्वभौमं वासुदेवं पूजयामासुस्ततो नगरद्वारादागच्छन्तं रागकारं रजकं वीक्ष्य हरिराह ॥

१७७. नरेश्वरं द्रष्टुमिहागता वयं । बृन्दावनाद्भूमिपभागिनेयाः ॥
वस्त्राणि नो देहि मनोहराणि । भूयाच्छुभं ते रजकाग्रगण्य ॥

कन्नडा - मञ्जरी - चतुरश्रः ।

उ ॥ निर्णेजकोऽप्यवददित्थं किं - नीचगोप प्रलपसि ।
ध्रु ॥ दुर्णय कथं राजवस्त्राणि वि - दूषयितुं सन्तपसि ।
१ ॥ क्षीरदधिघृतग्रासोन्मत्त - श्चित्रं जल्पसि मूढ ।
दूरमपसर न चेत्ते प्राणा - धुन्वन्ति मदारूढ ।
२ ॥ हरिरपि तं रजकं चपेट प्र - हारेण प्रणिहतवान् ।
सुरुचिराणि वायकदत्तान्य - म्बराणि ततो विधृतवान् ॥

१७८. वायकायाथ सन्दायाभीष्टैश्वर्यं दयाम्बुधिः ।
कृष्णस्सुदामनिलयं गत्वा तेनेत्थमीडितः ॥

१७९. कुलं पवित्रं भवदागमेना भवन्मदीयं सदनं प्रसिद्धम् ।
आज्ञापय त्वत्पदकिङ्करोऽहं जगत्प्रभो किं करवाणि कृष्ण ॥

१८०. सुदामदत्तमालाभिर्भूषितो मधुसूदनः ।
वाञ्छितं वरयेत्यूचे स भक्तोऽपीत्थमब्रवीत् ॥

१८१. त्वत्पादकमलसेवां ।
तव भक्तैस्सह सदापि दृढसख्यम् ।
भूतदयामत्यन्तम् ।
तापसमन्दार देहि मे सततम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् ।। माधवोऽपि सुदाम्नेऽभीष्टवरं दत्वा - राजमार्गं गच्छ-न्नानालेपनभाजनधारिणी माननरुचिनिचयविनमिताब्जां कुब्जां समीक्ष्य - का त्वं - लेपनानि कस्मै निवेदयितुं व्रजसि - किं त्वन्नाम - देह्येतानि मह्यमतीव सौन्दर्येण प्रतिभासीत्यवदत् - तदा कृष्णं साबला प्रत्यभाषत - साधु साधु सुन्दरेद्दक्सरससंलापैर्माद्दशीम्मा गर्हिष्टाहं कंसदासी त्रिवक्रनाम्नी विनिर्मललेपनचतुरा सन्ततराजसम्मानितेति वदन्ती नन्दनन्दनरूपेण वीक्षणेन मन्दहासेन नर्मसम्भाषणेन विमोहिता तमनुलेपनानि प्रियप्रियेणा-दादीद्दक्प्रकारेण कुब्जादत्तानि लेपनानि हरिरपि स्वीकृत्य प्रसन्नो भूत्वा घटसाघटसापटिष्ठस्त्रीवक्रामवक्रां चकार - ततस्सा दासी हरिकरस्पर्शमहिम्ना त्रिलोकैकसौन्दर्यवती भूत्वा कृष्णं काङ्क्षया विलोक्य तस्योत्तरीयं गृहीत्वा - पञ्चशराकारमदालयमेहीति मनोजबाण भग्नहृदया भवन्ती समाकृक्षत् - तां वीक्ष्य मन्दमन्दं हसन्स हृषीकेशः - कामिनि त्वत्काङ्क्षितं सफलं भविष्यत्यचिरेणेति वदन् - धनुश्शालां प्रविश्य - भूरिवीरगुप्तं कंसशरासनं वामकरेणोद्धृत्य राजभटैर्निवारितोऽपि मौर्वीलतासन्धानं कृत्वा रसालदण्डं गन्धेभ इव खण्डयित्वा प्रकुपितान्बाणासन रक्षकान्कोदण्डखण्डेन मर्दयित्वा यथेष्टं मधुरानगर्यां विहृत्याग्रजेन सह निवासं जगाम ।।

१८२. कंसोऽपि दुस्वप्नशतानि पश्यन् ।
कथञ्चिदत्यन्तभिया त्रियामाम् ।
नीत्वा प्रभाते पृथुमल्लरङ्गम् ।
प्रविष्टवान्नाशयितुं मुकुन्दम् ।।

१८३. निष्कण्टकः समतलः ।
सुवासितश्शोणमृण्मयोऽप्यार्द्रः ।
नानाप्रेषककलितः ।
केतुयुतस्तूर्यसादितो रङ्गः ।।

In Public domain. Digitization Muthulakshmi Research Academy

मोहनः - मञ्जरी- चतुरश्रः ।

१ ॥ मञ्च उपविवेश ततः कंसोऽ - मात्याद्यैस्समुपेतः ।
सञ्चिन्तयन्भाविकर्तव्यं - जनार्दनादतिभीतः ॥
२ ॥ नन्दाद्याः सर्वयादवा भू - नाथाज्ञयोपविष्टाः ।
सान्द्रानन्देनोपायनानि - सन्निवेद्य परितुष्टाः ।
३ ॥ बलकृष्णौ दुन्दुभिनिनदं श्रु - त्वा ततस्समुत्साहौ ।
सललितवेषौ रङ्गद्वारं - जग्मतू महाबाहौ ॥

१८४. गजं कुवलयापीडनामानं बलकेशवौ ।
निहन्तुं प्रेरयामास निषादी सहसा ततः ॥

ग ॥ द्विरदोऽपि हस्तिपकप्रेरितो महावातसङ्घातसमुद्धूतविलयकालकीलीव समुत्पतन् - मृत्युरिव शमनो यथाभिमुखं गत्वा - मदसलिलपरिमल लुब्धपरिभ्रमददभ्रभ्रमरझङ्कारसमुद्दीपिताहङ्कारः - कुलकुम्भिनीधर गुहाकुम्भगुम्फदूघीङ्कारे - रोषभीषणशेषभोगिभयङ्करं करं प्रसार्य शौरिञ्जग्राह - हरिरपि विधुन्तुदवदनगह्वरविमुक्ततरणिरिव - करिकरबन्धनादुद्गम्य - तत्पादमध्यस्यासाध्यो बभूव - क्रोधबन्धुरसिन्धुरोऽपि महार्णवमध्यमन्थाय मानमन्थरमहीधर इव चक्राकारेण भ्रमित्वा स्वपुच्छानुसारिणं कृष्णं वीक्ष्य प्रलयदण्डिदण्डप्रशस्तहस्तेन गृहीत्वा पातयितुमयतत - पुण्डरीकाक्षोऽपि निश्चलो भूत्वा झटिति समुप्लुत्य महाराहुवल्लिकाकर्षणोदीर्णसुपर्ण इव शुण्डालवालं धृत्वा पञ्चविंशतिबाणासनप्रमाणदूरमनेकपमुद्भ्रामयन्विचिक्षेप - वारणोऽपि दुर्निवारणोत्साहः सव्यापसव्यपरिभ्रमणैरवक्रतया विजृम्भयाञ्चकार - ततो मुकुन्दोऽप्यपसव्यक्रमैर्विलङ्घ्य तम्मदगजं पुरस्कृत्य - मेचका-चलतुङ्गशृङ्गनिभकुम्भं दुरन्तकल्पान्तजीमूतनिर्घातनिष्ठुरमुष्टिना जघान - समुत्पाटितकुम्भविकीर्णपूर्णरक्तसिक्तमौक्तिकैर्वसुन्धरां सन्ध्यारागा-रुणतारकाच्छन्ननभ इव प्रसाधयन् पतन्नपि समुत्थाय संहारसमयसमुद्र सङ्घातसम्भूतसमुत्तुङ्गभङ्गसङ्घट्टितकुलाचल इव - मधुसूदनहस्ताहस्तिसङ्गरेणा

In Public domain. Digitization Muthulakshmi Research Academy

सकृन्मर्दितो हठादकुण्ठितकालकण्ठकठोरभल्लभग्नत्रिपुरमिव- चटुलजञ्झानिल-विकलितकलमिव मदकलोऽपि हीनबलो - लोभिकर इव दानसलिलधारा-विरहितो विरहिमनोरथ इव निरन्तरचित्तजातनिग्रहोग्रहणकाल इव पराधीनखरकरः खरकरोदय इव भिन्नपुष्करः पुष्करवैरिविलसनमिवा नवभासितपद्मको बभूव ॥

१८५. तमङ्घ्रिद्वन्द्वेना - सकृदपि तुदन्दन्तयुगलम् ।
करेणोद्धृत्य द्रा - ग्विरहितबलं यादवहरिः ।
उपेन्द्रो गन्धेभं - प्रसभमसुलोभं गिरिणिभम् ।
सुनीलाभं वीरा - ग्रणिरथ जघानातिसुलभम् ॥

१८६. अंसराजितकुम्भीन्द्रदन्तौ तौ बलकेशवौ ।
रङ्गप्रविष्टौ संदृश्य कंसोऽभूद्भयविह्वलः ॥

१८७. नटाकारौ धीरौ - भुवनशुभकारौ मणिमयो ।
र्वलङ्कारौ वीरौ - व्रजवरकुमारौ जनततिः ।
वधूमारौ मल्ला - वनितलविहारौ बहुमुदा ।
मुहुर्लोकित्वापी - षदपि नहि तृप्तिं प्रतिययौ ॥

१८८. अभूतपूर्वचारित्रं - चाणूरो वीक्ष्य बालकम् ।
वैकुण्ठ इति तं ज्ञात्वापीत्थम्मात्सर्यतोऽब्रवीत् ॥

सारङ्गः - रूपकः ।

उ ॥ एहि कृष्ण मुष्टियुद्ध - मीप्सितं यदि ।
ध्रु ॥ बाहाबाहविचरेव - प्रभोः संसदि । ॥ए॥
१ ॥ महीशं विनोदयाव - मल्लसंयता ।
अहो तिष्ठ रे ते चे दस्त्यहंयुता ॥ ॥ए॥

In Public domain. Digitization Muthulakshmi Research Academy

१८९. कियन्मात्रस्त्वं रे - नृपसदसि योद्धुं सह मया ।
गुणी विख्यातोऽहं - कुलज उरुसत्कर्मनिरतः ।
किमेतादृक्स्वप्नेऽ - पि तव बत भूतिर्विलसति ।
व्रजस्त्रीणामग्रे - भवतु महिमा भीरसुत ते ॥

ग ॥ इत्थं वदन्स चाणूरो रोषाग्निधूमप्ररोहेणेव शिरोविभासितसूक्षशिखया - मत्तेभेन्द्रहस्ताभ्यामिव भीकरबाहुदण्डाभ्यां - विलयसमयान्तकोल्लसित दंष्ट्राभ्यामिव निष्ठुरकुटिलश्मश्रुभ्यामञ्जनगिरिणेवाभीलदेहेन विराजमानः - पदघट्टनैर्भूमिं प्रकम्पय - न्भुजास्फालननिर्घोषेण नभोमण्डलं विभेदयन् कठिनकरेण शौरिंजग्राह - हरी इव - गिरीव - तावन्योऽन्यहेतिहिंसित-दवानलाविव - परस्परदीर्घनिर्घातघट्टितमहाप्रलयमेघावि - वेतरेतर-समुत्तुङ्गतरङ्गसन्ताडितकल्पान्तकालसमुद्राविव - रौद्रेण मिथः कठोरमुष्टिघट्टनसङ्घट्टितशरीरावभ्रमता - मत्रान्तरे हरिश्चाणूरं ग्रहीत्वा भूमौ पातयित्वा वज्रकर्कशमुष्टिघातेन सहसा विगतासुं चकार - परिशिष्टमल्ला अपि भयविह्वलाः पलायामासुः - प्रधानमल्लनिषूदनं गोपसमाजे मृगराज इव विराजमानं - वामचरणनिनदत्सुवर्णविजयनूपुरं यशोदानन्दनं वीक्ष्य सर्वे जना विना कंसं प्रशशंसुस्तदा सभाजनकलकलं निवार्य निजमन्त्रिणो वक्ष्यमाणं कंसो बभाण ॥

भैरवी - त्र्यश्रजातिरूपकः ।

उ ॥ वल्लवबालं बहि - र्द्वारं हठान्नयत ।
ध्रु ॥ क्षुल्लकं नन्दं निरुध्य - गोपान्प्रक्षेपयत । ॥व॥
१ ॥ वसुदेवं निहतद्रा - ग्वप्तोग्रसेनो न मे ।
प्रसभमेतमसुहीनं - प्रकुरुत योऽरिं चकमे ॥ ॥व॥

In Public domain. Digitization Muthulakshmi Research Academy

१९०. इत्थं वदन्तं भोजेन्द्रं मञ्चादाकृष्य केशवः ।
व्यापादयामास ततः पञ्चास्यस्सैरिभं यथा ।।

१९१. जघान बलरामोऽथ कृद्धान्राजानुजन्मनः ।
जनयामास निर्भीताः पुष्पवृष्टिं दिवौकसः ।।

१९२. मोचयित्वा बन्धनानि देवकीवसुदेवयोः ।
सहाग्रजेन गोविन्दो नमस्कृत्येत्थमब्रवीत् ।।

हिन्दूस्थानिभैरवी - रूपकः ।

उ ।। प्रसीदतामावयो - र्भव्यौ पितरौ ।
ध्रु ।। सुशीलावकरुणयो - श्श्रुतिमतचतुरौ । ।।प्र।।
१ ।। मद्धेतोः कारायां - बद्धौ सुजनौ ।
वृद्धौ सुकुमारावु - द्वेजितवृजिनौ ।। ।।प्र।।
२ ।। जाता वयं युवाभ्यां - जातु नोदिता ।
भूतिर्नस्त्वत्पुरतः - पुत्रकोचिता ।। ।।प्र।।

१९३. निखिलपुरुषार्थहेतो ।
राद्ध्यावस्मत्तनोर्युवां पितरौ ।।
शुद्धः कथं पितृणा ।
द्रवति शतेनापि मानवश्शरदाम् ।।

१९४. जननीजनकौ वृद्धौ ।
तनयान्गुरुविप्रसाधुदारादीन् ।
यश्शक्तोऽपि न पोषति ।
स एव जीवन्मृतो महीवलये ।।

In Public domain. Digitization Muthulakshmi Research Academy

ग ॥ इत्थं वदतो लीलामानुषस्य हरेर्वचनैर्विमोहितौ देवकीवसुदेवौ तनयमङ्के निवेश्य गाढं समाश्लिष्य तद्वदनाम्बुजं बाष्पैस्सिञ्चन्तौ प्रेमपाशबद्धौ तूष्णींबभूवतु - स्ततो वासुदेवोऽ प्युग्रसेनं राज्येऽभिषिच्य - कंसभीत्या विदेशेष्वटन्तं यदुवृष्णिभोजान्धकमरुदशार्हकुकुरप्रमुखसकलज्ञातिबान्धव-राजविसरं समाहूय यथोचितनिवासेषु संस्थापयामास ॥

१९५. इत्थम्मया विरचितं पितृबन्धविमोचनम् ।
श्रीनारायणदासेन कवितागानशालिना ॥

सुरटः मिश्रः ।

उ ॥ मङ्गलं श्रीकृष्णदेवाय भक्त - मन्दाराय सत्यभावाय ।
ध्रु ॥ मङ्गलं जगदाधाराय कोटि - मन्मथसुन्दराकाराय । ॥म॥
१ ॥ कमनीयकौस्तुभहाराय गोप - कामिनीमानसचोराय ।
अमलशारदेन्दुहासाय नाराय - यणदासहृद्वासाय ॥ ॥म॥

In Public domain. Digitization Muthulakshmi Research Academy

श्रीहरिकथामृतम्
तृतीयबिन्दुः
धर्मसंस्थापनम्

१९६. लक्ष्मीनाथं नृहरिं ।
कारणमाद्यं समस्तविश्वमयम् ।
सदयं मुकुन्दमीडे ।
गोविन्दं भक्तमानसानन्दम् ।।

१९७. प्रत्यक्षो भवति भवा ।
नहर्दिवं तावकीनभक्तस्य ।
हार्दाकाशे परित ।
स्तेजोरूपेण पुण्डरीकाक्ष ।।

कमाच् - आदितालः ।

उ ।। स्तौमि सदानन्दं गोविन्दं - शङ्करार्चितपदारविन्दम् । ।।स्तौ।।
ध्रु ।। कामितार्थदायकं मुकुन्दं - श्यामलं श्रितानन्दकन्दम् । ।।स्तौ।।
१ ।। लीलामानुषवेषं श्री - लालितनित्यसन्तोषम् ।
कालाम्बुदनिभं दुरितशोषं - कमनीयभाषं भक्तपोषम् । ।।स्तौ।।
२ ।। शारदचन्द्रिकामन्दहासं - सकलदुष्टदानवसन्त्रासम् ।
नारदऋषिमानसोल्लासं - नारायणदासहृदयवासम् । ।।स्तौ।।

बेगाड - रूपकः ।

उ ।। हेरम्बसदवलम्ब - चारुगुणकदम्ब ।
ध्रु ।। स्फारवक्त्रचन्द्रबिम्ब - सन्तोषितसाम्ब । ।।हे।।
१ ।। एकरदनमोक्षसदना - नेकपवदन ।
भीकरपातकदण्ड - विघ्नतिमिरमार्ताण्ड । ।।हे।।

In Public domain. Digitization Muthulakshmi Research Academy

२ ॥ नागयज्ञोपवीत - नतदेवव्रात ।
योगिहृद्यानगम्य - युक्तवचोरम्य । ॥हे॥

१९८. सकलजगत्सृष्टिस्थिति ।
लयहेतोभवमहाम्बुनिधिसेतो ।
मामव कृपया संश्रित ।
मानसनीरजनिवेशविघ्नेश ॥

काफी - रूपकः ।

उ ॥ वाणि मां पाहि हृग्जि - तैणिघननीलवेणि ।
ध्रु ॥ माणिक्यवीणालसत्पाणिस - म्यग्मोक्षनिश्रेणि । ॥वा॥
१ ॥ त्वां विनावपुरि - दं भवति वृथासत्यं बहुधा ।
त्वं विश्वस्यात्मां - बासिकल्याणराशि ॥ ॥वा॥

१९९. मधुरं देवि करुणया ।
मां वादय रञ्जनाय लोकस्य ।
भवतानुगृहीतो यः ।
सर्वत्र स एव पूज्यते मनुजः ॥

कन्नडा - रूपकः ।

उ ॥ रेरेमानस कितव व्या - प्रियसे किं पशुरिव ।
ध्रु ॥ शूरो भव शीलमव - सुभगं कुरु जन्म तव । ॥रे॥
१ ॥ आशयाबिबन्त्ससि कि - मात्मानं मूढ ।
केशवनाम्ना समया - क्रियामदारूढ ।
२ ॥ क्षणिकधनान्यार्जसि किं - सरघेवलुब्ध ।
फणिशयनं कृष्णं स्मर - पापावष्टब्ध । ॥रे॥

In Public domain. Digitization Muthulakshmi Research Academy

३ ॥ स्मराग्नौ निपतसि किं - शलभ इव भ्रान्त ।
हरिकथां शृणु नित्य - मज्ञानाक्रान्त । ॥रे॥

२००. शुकमिव सुमं शाल्मल्याः स्त्री - प्रभृत्यखिलं धनम् ।
मनुजमनिशं - तृष्णाबद्धं - प्रवञ्चयति ध्रुवम् ।
यदि नरहरे - र्भक्तिर्न स्या - द्भवेन्नरजीवितम् ।
कलितमपि तद्भोगैः सर्वै - र्वृथैव निरन्तरम् ॥

२०१. अविद्यानिद्रया जन्तुर्भवस्वप्नं प्रपश्यति ।
जागर्ति श्रीपतेर्नाम श्रवणेन न संशयः ॥

२०२. हरिभक्तिनौकयैव ।
प्रकटितसंसारवारिधिं तरति ।
इतरेण कर्मणाज्ये ।
नेव नरः प्रज्वलयति भववह्निम् ॥

२०३. ज्ञानेन मोक्षमाप्नोति भक्तिर्ज्ञानाय कल्पते ।
कृष्णप्रसादाद्भक्तिः स्यात्तस्माच्छेव्यो हरिस्सदा ॥

२०४. सात्विकाहारनिरतः सर्वभूतदयापरः ।
संसारविमुखो योगी हरिदास इति स्मृतः ॥

२०५. मृदःकुम्भो यथा भिन्न स्तथैव हरितो जगत् ।
इति मत्वा वीतरागद्वेषो भवति भक्तिमान् ॥

२०६. अन्तर्दृष्ट्यात्मानमेव तेजश्चक्रमिवेक्षते ।
बहिर्दृष्ट्या जगदिवारूढप्रज्ञो न संशयः ॥

२०७. आत्मन्येवा - विद्यया स्वप्नवस्तु ।
प्रायं विश्वं - वीक्ष्य मुह्यत्यविद्वान् ।
पश्यन् ज्ञानी - प्रज्ञयात्मानमेवा ।
नन्दत्यन्य - ज्ज्ञापनीयं किमस्ति ॥

In Public domain. Digitization Muthulakshmi Research Academy

२०८. स्वच्छायां दर्पणे पश्य न्युध्यते चटको यथा ।
मायायां स्वं वीक्षमाणस्तथा मूढो विमुह्यति ॥

२०९. नात्मनोऽन्यत्किञ्चिदपि वस्त्वस्ति परमार्थतः ।
बोबुधित्वेति सततं पण्डितो नानुशोचति ॥

२१०. हरिरात्मैव तद्ध्यानं भक्तिरित्यभिधीयते ।
जीवन्मुक्तो हरेर्भक्तः कर्मणा न विलिप्यते ॥

२११. ब्रह्मैव भवति ब्रह्मविदिति श्रुतिरब्रवीत् ।
नारायणं विजानीहि स एव त्वमसि ध्रुवम् ॥

केदारगौलः - रूपकः ।

उ ॥ द्रष्टुं नारायणं - दर्शयामि परायणम् ।
ध्रु ॥ शिष्टजनान्भजानिशं - दुष्टांस्त्यज दिवानिशम् । ॥द्र॥
१ ॥ मा कुरु प्राणिहिंसां - भण देवताप्रशंसाम् ।
स्वीकुरु गुरूपदेशं - विदलस्त्रीमोहपाशम् ॥ ॥द्र॥
२ ॥ स्वकष्टार्जितेनैव - सन्ततमन्नेन जीव ।
चकाद्धि स्वच्छन्देन - चर हरिभक्तिबृन्देन ॥ ॥द्र॥
३ ॥ पूर्वाचारमवेहि - पुण्यतीर्थेषु स्नाहि ।
सर्वदाष्टाक्षरीं जप - सत्यमेवालप ॥ ॥द्र॥

२१२. तेजःपूर्ति - निर्गुणो निर्विकारः ।
साक्षी नित्यः - सच्चिदानन्दमूर्तिः ।
एको देवः - कृष्ण एवास्ति नूनं ।
तस्मिन्विश्वं - कल्पितं किन्त्वसत्यम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

२१३. इति निरन्तरभावनया जग ।
द्वियदिव प्रतिभात्यविकारतः ।
किमपि वस्तु विलोक्य न मुह्यसि ।
क्रमश एषि लयं परमात्मनि ॥

२१४. आत्मैवेदं सर्वमिति शान्तचित्तो भवानिशम् ।
उक्त्वालं शुष्कवेदान्तं पिब कृष्णकथामृतम् ॥

२१५. वैराग्येणाथवा भक्त्या कैवल्यं प्राप्तुमर्हसि ।
असाध्यमेव वैराग्यं देहिनो नात्र संशयः ॥

२१६. श्रद्धया लभते भक्तिं भक्त्या मोक्षं प्रविन्दति ।
श्रुतिस्मृतिपुराणेषु श्रद्धधाहि ततोऽनिशम् ॥

२१७. नवभक्तिविधानेषु मुख्ये श्रवणकीर्तने ।
कथां शृणु हरेस्तस्य नामसङ्कीर्तनं कुरु ॥

केदारगौलः - रूपकः ।

उ ॥ विष्णो नारायण गो - विन्द नारसिंह कृष्ण ।
ध्रु ॥ दोष्णारिं नाशय मेऽ - धोक्षजगततृष्ण ॥ ॥वि॥
१ ॥ माधवोपेन्द्राच्युत - मधुसूदन सङ्कर्षण ।
श्रीधर पुण्डरीकाक्ष - त्रिविक्रम प्रमर्षण । ॥वि॥
२ ॥ वामन हृषीकेश - वासुदेवानिरुद्ध ।
दामोदर जनार्दन - त्राहि मां सत्सम्बद्ध ॥ ॥वि॥

मुखी ॥

जननस्थिति - नाशकारणं । हरिरित्यव - गम्य सन्ततम् ।
भज मानव - विश्वतोमुखं । शृणु तस्य सु - कीर्तिमञ्जसा ॥

In Public domain. Digitization Muthulakshmi Research Academy

२१८. आत्मवशाद्भ्रमतिमन ।
स्त्वं तु मनोऽधीन एव विभ्रमसि ।
विश्रान्तिमिच्छसि यदि ।
प्रभुमाश्रितरक्षकं भजोपेन्द्रम् ।।

२१९. वेदमुखेन प्रवदति ।
कार्याकार्याणि साधुमवति सदा ।
सत्प्रार्थनां शृणोति ।
त्रिभुवनमभिशास्ति पुण्डरीकाक्षः ।।

२२०. जिह्वासाफल्यं किम् ।
नाम्नः सङ्कीर्तनं मुकुन्दस्य ।
घोरभवरोगशान्त्यै ।
किमौषधं हरिकथाश्रवणमेव ।।

२२१. वासुदेवः सर्वमिति यावद्भवति भावना ।
तावदेवास्ति संसारवासना नात्र संशयः ।।

२२२. गोविन्दनामस्तवनेन नित्यम् ।
हरेः कथासंश्रवणेन साधुः ।
नृसिंहभक्त्या भुवनं समस्त ।
मेतन्मृषैवेति विनिश्चिनोति ।।

काफी - रूपकः ।

उ ।। हरिकथामृतं पिबरे - दुरितदूषित ।
ध्रु ।। स्मर नारायणनाम - मरणभीषित । ।।ह।।
१ ।। साधुसहायतां प्राप - सततं दीन ।
श्रीधरमेव भजस्वा - रेऽन्याधीन । ।।ह।।
२ ।। नवविधभक्तिमार्गमनु - सर भवभीत ।
दिवानिशं प्राणिवर्ग - मवावगीत । ।।ह।।

In Public domain. Digitization Muthulakshmi Research Academy

२२३. माकार्षीस्त्वं क्रतुमुख ।
दारुणकर्माणि दनुजकृत्यानि ।
भयशोकवर्धनानि ।
स्मर कैवल्याय हरिमहोरात्रम् ।।

२२४. क्षुदादिवेदनाङ्गस्य स्वभावात्पीडते जनम् ।
न्यायेन शमयित्वा तां भज कृष्णं निरन्तरम् ।।

२२५. श्रेष्ठं भवति गार्ह्यस्थ्यमाश्रमेष्वखिलेष्वपि ।
गृहस्थ एव गोविन्दं शक्यते समुपासितुम् ।।

२२६. शाश्वतैश्वर्यमाप्नोषि स्मर कृष्णं निरन्तरम् ।
सन्त्यज्याप्यखिलान्धर्मा न्किंवक्तव्यमितःपरम् ।।

२२७. पुरा परिक्षितं कृष्णकथाश्रवणलालसम् ।
शुकर्षिरब्रवीद्राजमुमुक्षो श्रद्धया शृणु ।।

२२८. उपनीतौ बलकृष्णौ ।
द्विजीकृतौ ब्रह्मचारिणौ काश्याम् ।
मासाधीयेते स्मा -
खिलविद्याः सद्गुरुं भजन्तौ तौ ।।

२२९. जरासन्धनृपं सप्त दशवारं विजित्य तौ ।
अनेकाक्षौहिणीं तस्य नाशयामासतुश्चमूम् ।।

२३०. सन्ततं शत्रुसुगमं विहाय मधुरापुरम् ।
चतुरौ वसतःस्माब्धि रक्षिते द्वारकापुरे ।।

२३१. बलराम उपायंस्त रेवतीं मधुसूदनः ।
रुक्मिणीप्रमुखानेककरभोरूरुपायत ।।

In Public domain. Digitization Muthulakshmi Research Academy

२३२. अमानुषं चित्रचरित्रमेतयो ।
रभूतपूर्वं कथितुं क ईशते ।
अहं यथाशक्ति वदामि सम्प्रति ।
त्वं श्रद्धया मां शृणु राजसत्तम ॥

मञ्जरी - भैरवी - चतुरश्रः ।

१ ॥ द्वारवतीनगरं जगाम स - त्राजिदेकदा तस्य ।
चारुशमन्तकमणिमीक्षित्वा - जना वासुदेवस्य ॥
२ ॥ तरणिबिम्बसङ्काशमभूवं - स्ततो विस्मिताः कृष्णः ।
तरसाधिपाय देहि तमित्यव - ददपि हन्त गततृष्णः ॥
३ ॥ सत्राजिदप्यनङ्गीकृत्य - स्वपुरमगमद्विहस्य ।
पात्रसाद्भवति न कदापि मान - वस्य धनं कृपणस्य ॥

२३३. सत्राजिदनुजं हत्वा वने सिंहो शमन्तकम् ।
हतवान् जाम्बवांस्तं प्रणिहत्य मणिमाहृतः ॥

२३४. सत्राजिद्भ्रातरं हत्वा कृष्ण एव शमन्तकम् ।
हतवानिति सर्वत्रापवादोऽजनि भूतले ॥

२३५. अपहर्तुं तां निन्दाम् ।
सर्वज्ञो झटिति वासुदेवोऽपि ।
यत्र प्रहतो सत्रा ।
जिद्भ्राता तत्र वेगतोऽगच्छत् ॥

२३६. हतं प्रसेनं तुरगं मृगेन्द्रम् ।
निरीक्ष्य विस्मित्य ततो मुकुन्दः ।
द्राक्पादचिह्नाननुसृत्य भीमां ।
भल्लूकनाथस्य गुहां प्रविष्टः ॥

In Public domain. Digitization Muthulakshmi Research Academy

२३७. घोरान्धकारभूयिष्ठां गुहां तीर्त्वा त्रिविक्रमः ।
कदम्बवनमद्रीन्द्र राजिसंवृतमैक्षत ।।

२३८. वापीकूपतटाकपर्वतझरी - कासारसंशोभितम् ।
तस्मिंश्छत्त्रुभयङ्करं मधुफला - कीर्णं रहस्यं गृहम् ।
सन्दीप्तं महसा शमन्तकमणे - र्भल्लूकसेनापते ।
गत्वा भीकरसिंहनादमकरो - त्कृद्धस्ततो जाम्बवान् ।।

२३९. आजानुबाहुमरविन्ददलायताक्षम् ।
पीताम्बरं नवपयोधरनीलवर्णम् ।
लोकोत्तरं कुटिलकुन्तलमीक्षमाणो ।
विस्मित्य भल्लुकपतिर्वदति स्म कृष्णम् ।।

सारङ्गः - आदिः ।

उ ।। रेरे गर्जसि बालक किम - रे साहसं तेऽधुना ।
ध्रु ।। प्रेरितश्शश इव महानसमचि - रेण मत्सकाशं विधिना । ।।ले।।
१ ।। अन्तकोऽपि बिभेति मदाज्ञ - या विना मम वनं प्रवेष्टुम् ।
हन्त पलायस्व शीघ्रमेव - यास्यसि नो चेन्मृत्युं द्रष्टुम् ।। ।।ले।।

२४०. कृतवान्प्रदक्षिणमहं ।
त्रिविक्रमाङ्घ्रेरहं क्षणेनैव ।
सीतारामादन्यम् ।
तृणाय मन्ये न कञ्चिदपि जगति ।।

कन्नडा - मञ्जरी - चतुरश्रः ।

१ ।। वदन्तमिति जाम्बवन्तमभण - द्वासुदेवो विहस्य ।
मुदा वृद्धभल्लुकयुवेव किं - मोदसे स्वं प्रशस्य ।
२ ।। अलमवलेपेनात्मस्तुतिना - हन्त वार्धकोचितशान्तिम् ।
कलय शृणु मदागमनहेतुमा - कर्णयन्किंवदन्तिम् ।

In Public domain. Digitization Muthulakshmi Research Academy

३ ॥ शमन्तमणिहर्ताहमिति ततः - सम्प्रति मृषापवादम् ।
शमयितुमगमं तन्मणये त्व - त्समुखमेवाप्रमादम् ।
४ ॥ त्यज तव दोर्गर्विण सह शम - न्तकमणिं भल्लुकेश ।
भज मां सीताराममिव सदा - भक्त्या मोहावेश ॥

२४१. उदित्वेत्थं हृषीकेशो जाम्बवत्कन्यकां पुरः ।
वीक्ष्य प्राह हसन्मन्दं - शमन्तमणिभूषिताम् ॥

श्रीः - आदिः ।

उ ॥ बाले परिचितमिव मां पश्यसि - वद किं मृदुशीले सुखमूले ।
ध्रु ॥ फाले तेऽधररागचोरकं वहसि मणिं किमवर्णकारकम् ॥ ॥बा॥
१ ॥ दीयेत मणिर्यदि त्वया तव - तृह्येत पिता न मया ।
ध्यायसि यं त्वं स एवाहम - ब्जाक्षि भूया मम प्रिया ॥ ॥बा॥

२४२. मया यो वीक्षितस्स्वप्ने स एवैष न संशयः ।
इति बाला विस्मिताभूत् केशवं प्राह जाम्बवान् ॥

पूर्वकल्याणी - आदिः ।

उ ॥ बालिकापुरो विकत्थसे गो - पाल डिम्भ किम्मदावष्टम्भ ।
ध्रु ॥ बालिशनीचयादवस्त्वं क्व - परमात्मा जानकीपतिः क्व । ॥बा॥
१ ॥ यस्य पादरजसा शिलाप्यभू - दङ्गना यो रावणमवधीत् ।
ध्वस्यते स्म येन शिवधनुरपि-तस्य तेऽस्ति हस्तिमशकान्तरं मत्। ॥बा॥

२४३. रे मायिन् क्षत्रबन्धो - यवननरपति - र्वेत्ति ते शौर्यसारम् ।
कुब्जावामाङ्घ्रिलाक्षा - रसकलितशिरो - वेष्टहेमातुलघ्न ।
रामं लोकैकवीरं - रघुकुलतिलकं - जानकीप्राणनाथम् ।
लज्ज्ञाहीनात्मना किं तुलयसि कपट - स्वान्त तं सत्यवाचम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

२४४. तारतम्यं ज्ञास्यसि त्वं - तव रामस्य सम्प्रति ।
मुष्टिनेति वदन् कृष्णं ताडयामास जाम्बवान् ।।

२४५. लीलामानुषरूपे ।
परमात्मनि केशवे वृथैवाभूत् ।
जाम्बवतः सामर्थ्यम् ।
जीवन्मुक्ते यथाभवौद्धत्यम् ।।

२४६. दरितुं पातयितुं स
श्लथयितुमयतिष्ट बहुविधोपायैः ।
कृष्णं भल्लूकपतिः ।
किन्त्वाकाश इव हरिरभूदचलः ।।

२४७. आश्चर्ययुक्तो निर्विण्णमानसो जाम्बवांस्तदा ।
पीडितावयवः क्षीणसत्व इत्थं व्यतर्कयत् ।।

नीलाम्बरिः - आदिः

उ ।। हाहाहाधिग्दैवदुर्विपाकं को - हातुं शक्तः कालदन्दशूकम् ।

१ ।। मासं प्रयते वृथैनमहं जेतुं रा - मः किं नहि मां स्पृहयति भक्तं पातुम् ।

२ ।। ईदृग्महिमानं क्वापि नह्यपश्यं स्या-देवमेव मदहङ्कारफलमवश्यम् ।।।हा।।

२४८. आवयोर्द्वापरे मल्ल साम्परायो भविष्यति ।
इत्यवोचत्पुरा रामः स एवायं न संशयः ।।

२४९. रामो नचेदयं साक्षान्मद्बलं सहते कथम् ।
जाम्बवानिति निश्चित्य सोऽस्तौषीज्जानकीपतिम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

काम्भोजी - एकतालः

उ ॥ जयजयराम मेघश्याम - सार्वभौम सम्पूर्णकाम ।
ध्रु ॥ जयजयजय निश्रेयसोद्दाम - जानकीनयनकुवलयसोम । ॥जय॥
१ ॥ जयजयसच्चिदानन्दरूप - सदमलसंयमिमानसदीप ।
जयजयजयपाटितहरचाप - सम्भृतसत्यज्ञानकलाप । ॥जय॥

२५०. मायामानवविग्रहेण हतवा - न्दैतेयसङ्घं पुरा ।
लीलामानुषवेषतोऽवनिभरं - हर्तुं त्वमद्यागतः ।
इत्थं रामविनिर्गुणोऽप्यसि जग - द्रूपेण तत्त्वं तव ।
ज्ञातुं त्वत्कृपया विना जडमति - र्मादृक्कथं शक्यते ॥

२५१. त्वत्सङ्गमोत्सुकैषा मे पुत्रिका तप्यते तपः ।
हे राम स्वीकुरुष्वैनां शमन्तमणिना सह ॥

२५२. किमसाध्यं भवत्पादभक्तस्य पुरुषोत्तम ।
मां पाहीन्दीवरश्याम राम सत्यपराक्रम ॥

२५३. कृतार्थोऽहं भवत्पाददर्शनेनास्मि सम्प्रति ।
राम दूर्वादलश्याम सृष्टिस्थित्यन्तकारण ॥

२५४. समस्तजगदाधार सच्चिदानन्दविग्रह ।
राम त्वं मम जामाता कोऽस्ति मादृशभाग्यवान् ॥

२५५. वदन्तमित्थं चतुरं कृताञ्जलिम् ।
सन्तोषबाष्पाकुलितेक्षणो हरिः ।
मन्दं हसित्वाह नखायुधाग्रणिम् ।
दयाम्बुधिर्भागवतावनोत्सुकः ॥

२५६. त्रेतायां सचिवोऽभूर्मे श्वशुरोऽद्य महामते ।
इतःपरं जाम्बवंस्त्वं मत्सायुज्यमवाप्नुहि ॥

In Public domain. Digitization Muthulakshmi Research Academy

धनश्रीः - मञ्जरी - चतुरश्रः

१ ॥ जाम्बवन्तमनुगृह्य जगाम - जाम्बवत्या सह हरिः ।
सम्मदेन द्वारकापुरं - शासितदिविषदरिः ।
२ ॥ सत्राजिदपि ददौ कृष्णाय - स्वतनयां सत्यभामाम् ।
स्तोत्रपात्राय धूतनिन्दाय - सुललितास्यजितसोमाम् ।

२५७. महिमानं हरेर्ज्ञातुं क ईष्टे पाण्डवोत्तम ।
मत्पितुः कृपया तुभ्यं कथयामि यथाश्रुतम् ॥

२५८. महेन्द्र एकदा कृष्णं द्वारकानगरस्थितम् ।
वीक्ष्य दीनाननो भूत्वा वदति स्म कृताञ्जलिः ॥

यदुकुलकाम्भोजि - त्र्यस्रः ।

उ ॥ देवदेव जगन्नाथ - दीनबन्धो कृष्ण ।
ध्रु ॥ भावातीतप्रभाव - प्रभो विगततृष्ण । ॥दे॥
१ ॥ सृष्टिस्थितिकारण - सेवकावनपरायण ।
कष्टभवाम्बुधितारण - कमलाक्ष नरायण । ॥दे॥
२ ॥ लीलामानुषविग्रह - लेखविद्विषविनिग्रह ।
नीलनीरदश्याम - नित्यसम्पूर्णकाम । ॥दे॥

२५९. त्रिविष्टपमुपप्लुतं - झटिति कान्दिशीकाः सुराः ।
पविर्विफलितो हठा - ददितिकुण्डले दूषिते ।
सुपर्वगिरिरुद्धृतः - प्रमथितस्स ऐरावण ।
स्त्रिविक्रम वदामि किं - नरकदैत्यदुश्चेष्टितम् ॥

२६०. पातुं भक्तान्दुष्टान् ।
हन्तुं देव त्वमित्थमवतरसि ।

In Public domain. Digitization Muthulakshmi Research Academy

त्रिगुणातीतोऽपि विभो ।
तव लीलां कृष्ण को विजानाति ॥

२६१. नारायणं कृपाम्भोधिमार्तत्राणपरायणम् ।
रक्षोवधाय सन्नद्धं सत्यभामा तदाब्रवीत् ॥

शहना - रूपकः

उ ॥ त्वयाहमपि सह गन्तुं - वाञ्छामि मुकुन्द ।
ध्रु ॥ मया तव कदनमहिमा - मन्तव्यो गोविन्द । ॥त्व॥
१ ॥ असम्भवनीयः कोऽ - न्योऽधोक्षजवीररसात् ।
भणामि तव कौशलं स - पत्नीर्मे सरभसात् ॥ ॥त्व ॥

२६२. सितसरसिजा - भं ते नेत्रं - कथं युधि रज्यते ।
सततललित - स्मेराङ्कुरः कथं प्रहसिष्यसि ।
त्वमपि करुणा - म्भोधिर्नित्यं - कथं बहु कुप्यसि ।
त्वयि गुणपरी - णामं वीक्षे - धुना पुरुषोत्तम ॥

२६३. त्वदाश्रितजनं क्वापि न कथञ्चिद्भयं स्पृशेत् ।
मदभीष्टं वरं देहि भक्तमन्दारकेशव ॥

भैरवी - मञ्जरी - चतुरश्रः ।

१ ॥ इति विनयेन प्रार्थयन्तीं - कृष्णोऽपि सत्यभामाम् ।
द्रुतं समाश्लिष्य गरुडं समा - रोहयद्युद्धकामाम् ।
२ ॥ वहंस्तटिल्ललितजीमूतमिव - भामाश्लिष्टविष्णुम् ।
सहसासुपर्ण उड्डिड्ये भव - सङ्कटनिराकरिष्णुम् ।

२६४. नरकासुरपत्तनोर्ध्वदेशे । स्थितवान् शीघ्रमुपेत्य वैनतेयः ।
समजाघुषदत्र पाञ्चजन्यं । दनुजानीकभयङ्करम्मुकुन्दः ॥

In Public domain. Digitization Muthulakshmi Research Academy

२६५. तच्छ्रुत्वा मुरदानवः प्रचलयन् - कुप्यन् शिरःपञ्चकम् ।
धुन्वन्श्मश्रुवितानमाशु विहस - न्नक्षिभ्रुवं घूर्णयन् ।
गर्जन्स्वं प्रणुवन्दशन्नधरमा - तन्वन्भुजान्फालनम् ।
प्राक्षौप्सीद्घनशूलमुग्रकदना - याहूय नारायणम् ।।

२६६. आगच्छन्तं शूलमुद्वीक्ष्य शौरिर्गृह्णन्मुष्ट्या जानुना द्रागबभञ्ज ।
विस्मित्यासातीव रक्षो गदां तामप्याभाङ्क्षीद्वासुदेवो विहस्य ।।

२६७. गलितुं गरुडेन सहाथ हरिं । विवृतानन आशु दधाव मुरः ।
अरिणा तदयुग्मशिरांसि हस । न्विददाल रमापतिरप्यचिरात् ।।

२६८. बहवस्तत्सुताः क्रुद्धा राक्षसा भीमविक्रमाः ।
सहस्रारेण निहता युध्यमाना मुरारिणा ।।

२६९ ददीक्षमाणो नरकासुरोऽपि।
युद्धाय सेनासहितो जगाम ।
तदाब्रवीच्छार्ङ्गधरं प्रणम्य ।
भामा रणोत्साहविशालनेत्रा ।।

श्रीः - खण्डः ।

उ ।। देहि मे बाणासनं कृष्ण गोविन्द - दृप्तदानवचमूं हन्मि - सदानन्द ।
ध्रु । हे हृषीकेश तव वल्लभाया मम - कृतिरसाध्या का जगति त्रिविक्रम । ।।दे।।
१ ।। संवेदयामि स्त्रीपुरुषयोस्तारत - म्यं वासुदेव सच्चिदानन्दस्वभाव ।।दे।।

२७०. इत्थं वदन्त्यै गोविन्दो शार्ङ्गं मन्दं हसन्ददौ ।
साम्परायोत्सुकायै को व्यतिक्रामेत्प्रियावचः ।।

२७१. निबिडं कबरीबन्धं कृत्वा काञ्चीं दृढं समाबध्य ।
सत्याप्रत्यालीढस्थित्या समनीनदत्तदा मौर्वीम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

२७२. विकीर्य बाणान्दशदिक्षु भामा ।
व्यनीनशद्दैत्यचमूंक्षणेन ।
दुर्गा यथा प्रैक्षि लुलायरक्षो ।
वधोत्सुका सा नरकासुरेण ।।

२७३. अलं श्रमेणाततलोललोचने ।
स्त्रिया पुमान्निर्जित एव सर्वदा ।
वदन्स इत्थं नरकासुरो वि ।
हसन्नवोचन्मधुसूदनं तदा ।।

भैरवी - त्र्यस्रः ।

उ ।। किमरे गोपाल ना - रीपुरस्कृतोऽसि त्वम् । ।।कि।।
ध्रु ।। समरे गलितलज्ज तव - जायां हन्मि किमहो ते तत्वम् ।। ।।कि।।
१ ।। करवाण्यद्यप्रभृति भु - वनं सर्वमवैष्णवम् ।
कुरु गण्यं वीरयुथं - खलु कृत्वा तव जैष्णवम् ।। ।।कि।।

२७४. त्रिभुवनमिदं - दुःखप्रायं - सृजस्यखिलं मुधा ।
नट इव जना - न्नानाकारैः - प्रपञ्चयसेऽनिशम् ।
क्षितिपतिमपि - त्वद्भक्तं त्वां - करोषि विरागिणम् ।
गुणविरहित - त्वामद्याहं - निहन्मि जनार्दन ।।

ध्रु ।। इति वदन् गदया नरकासुरः । परुषया गरुडं समताडयत् ।
स्रगिव सा विनतासुतमस्तकं । समदिदीपदतित्वरया तदा ।।

२७५. प्राप्ताश्चर्य - श्शूलमुद्दह्य कृष्णं सन्नद्धोऽभू - द्दानवेशो निहन्तुम् ।
गोविन्दोऽपि - द्राक्छिरो देवतारेश्चक्रेण प्र-च्छेदयामास भीमम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

२७६. गीर्वाणौघः - पुष्पवृष्टिं ववर्षु ।
नृत्यन्ति स्मा - थाप्सरो वेदवाक्यैः ।
मौनीन्द्राः स - न्तुष्टुवुः पद्मनाभम् ।
दुर्वृत्ते व्या - पादिते दानवेन्द्रे ॥

जंझाटी - मञ्जरी - चतुरश्रः ।

१ ॥ शरणार्थिनममरारिसुतं दनु - जनगरे समभिषिच्य ।
नरकहृताः षोडशसहस्रक - न्याः कारात्प्रविमोच्य ।
२ ॥ तासामिष्टानुसारतस्ता - द्वारकापुरीं नीत्वा ।
वासुदेवोऽमरनगरमेत्य सु - पर्वमातरं नत्वा ॥
३ ॥ दत्वा क्रव्यादहृतकुण्डल - द्वयमस्यै देववनम् ।
गत्वा हृतमन्दारः स कृत - घ्नं जित्वा दुश्च्यवनम् ॥
४ ॥ गरुडमारुह्य भामयायुतोऽ - गमत्स्वकीयावासम् ।
हरेः पराक्रममभिवर्णितुं स - मर्थ कः पर्यासम् ॥

२७७. षोडशसहस्रकन्याः ।
पाणौकृत्य त्रिविक्रमस्ताभिः ।
सद्यश्चिक्रीड प्र ।
त्येकमनिर्वाच्ययोगमहिमाढ्यः ॥

२७८. जगतः कारणं कर्मफलदाता जनार्दनः ।
रक्षति स्म कुचेलं तत्कथां शृणु नरोत्तम ॥

भैरवी - त्रिपुटः ।

उ ॥ कुचेलः केशवसतीर्थ्यः - कोऽपि भागवतोत्तमः ।
ध्रु ॥ सुचरितः काश्यामुवास - श्रोत्रियः कविसत्तमः । ॥कु॥
१ ॥ साङ्गवेदाध्यापकः स - मस्तशास्त्रनिरूपकः ।
अङ्गजाभविग्रहः स - दाखिलपापनिग्रहः ॥ ॥कु॥

In Public domain. Digitization Muthulakshmi Research Academy

२७९. नवभक्तिविधानैः स सेवते स्मानिशं हरिम् ।
सद्गृहस्थः सत्यवादः कुचेलो वैष्णवाग्रणीः ॥

मञरी - जंझाटी - चतुरश्रः ।

१ ॥ कोमलाङ्गी वरवर्णिनी सा - कुचेलस्य भार्या ।
धीमती बहुलसन्तानवती - द्विजकान्ताचार्या ॥
२ ॥ अनवरतं हरिसेवयैव सम - यापयन्तमात्मपतिम् ।
प्रणम्य संसारविरक्तमतिं - बभाण मोक्षैकरतिम् ॥

शहना - त्रिपुट ।

उ ॥ विलोकय मामद्य सुहृदय - विष्णुभागवत प्रियसदय ।
ध्रु ॥ अलं मम जीवितेन त्व - दर्चनायाप्यशक्तेन । ॥वि॥
१ ॥ जीर्णसदनमिदं न सहते - शीतवर्षातपहतिम् ।
ऊर्णनाभिरचितवस्त्रै - र्होमकुण्डं प्रपिहितम् ॥ ॥वि॥
२ ॥ अन्नपानप्रतिकृतं त्व - या धृतं मौनव्रतम् ।
खिन्न एव निवर्तते ते - गृहादतिथिरनवरतम् ॥ ॥वि॥

२८०. तवैकादशपुत्रेषु - ज्येष्ठ एकादशाब्दिकः ।
अबलाहं विरक्तस्त्वं - कुटुम्बस्याद्य का गतिः ॥

२८१. अन्नपानातुरान्पुत्रान्दयालो परिपालय ।
सच्छात्रश्श्रीपतिस्ते त्वं - प्रमाणं प्राणवल्लभ ॥

२८२. इत्युदन्तीं प्रियामाह कुचेलो वैष्णवाग्रणीः ।
यदृच्छालाभसन्तुष्टो - मन्दस्मितमुखाम्बुजः ॥

In Public domain. Digitization Muthulakshmi Research Academy

नीलाम्बरिः - चतुरश्रैकतालः ।

उ ॥ दीनबान्धवः कृष्णेन विना - देवः कः सुमुखि ।
ध्रु ॥ श्रीनाथ एव रक्षक इति नि - श्चिनु मत्प्राणसखि ॥ ॥दी॥
१ ॥ दैवाधीनं जगत्सर्वमिति - तत्वविन्मनुते ।
केवलमिथ्यासंसारसुखं - किञ्चिन्नश्चिनुते ॥ ॥दी॥
२ ॥ आयुरन्नं प्रयच्छतीति शा - न्तात्मनामोदयस्व ।
प्रायो भवति वृथैव पौरुषं - भामिनि बुध्यस्व ॥ ॥दी॥

२८३. जगत्सृष्टिस्थितिलयान् यथेच्छं कुरुते हरिः ।
मायामात्रमिदं विश्वमद्वैतं परमार्थतः ॥

२८४. वासुदेवादन्यवस्तु मिथ्यैव व्योमनैल्यवत् ।
मा शोचीस्त्वं वृथा मुग्धे कर्ता भोक्ता जनार्दनः ॥

२८५. अहं ममेति विभ्रान्त्या देही सङ्क्षुभ्यते भृशम् ।
जीवन्मुक्तो भवत्येव विष्णुभागवतः प्रिये ॥

२८६. तृष्णोपशमनार्थं त्वं कृष्णनामामृतं पिब ।
इत्युदित्वा सुदामेत्थं वासुदेवमकीर्तयत् ॥

धनश्रीः - एकः ।

उ ॥ जयजयजयगोविन्द हरे कृ - ष्ण विष्णो मुरारे ।
ध्रु ॥ जयजयजयनारायण नृहरे - सङ्कर्षण शौरे । ॥जय॥
१ ॥ पतितपावन श्रितजनावन - प्रद्युम्न मधुसूदन ।
सततसन्तुष्टिसम्पादन के - शव नवनवनीतोदन ॥ ॥जय॥

२८७. किं भ्रामयसि माम्भ - वाम्भोनिधि भ्रमे - शुम्भदाश्रितपक्ष - कुम्भरक्ष ।
दीनं कुटुम्बिनम - दीनं तव ज्ञान - हीनमवाद्य मां - प्राणसचिव ।

In Public domain. Digitization Muthulakshmi Research Academy

संसारतृष्णां प्र - शमय दिव्यस्तोत्र - पात्रसच्छात्र मद्बाल्यमित्र ।
ललितवाक्पूरली - लामानुषाकार - गोपकिशोर गो - कुलविहार ।

त्रिभुवनाधार रुक्मिणी - हृदयचोर ।
साधुमन्दारदुष्टरा - क्षसविदार ।
वेदसञ्चारजगदेक - वीरधीर ।
हे जगन्नाथ पण्डित - हृद्विबोध ॥

झंझाटी - चतुरश्रः ।

१ ॥ तदा कृष्णसारथिर्दारुक - स्तं कुचेलं प्रणम्य ।
वदति स्माद्याहं प्रेषितवा - न्वासुदेवेन सौम्य ।
२ ॥ रथमारोहय सत्वरं त्वां - द्रष्टुकामो मुकुन्दः ।
यथार्थतस्स द्वारकां पाल - यति सम्प्रति गोविन्दः ॥
३ ॥ तदा भार्यया सुदामाब्रवी - द्धन्या वयं सुशीले ।
प्रदेहि निवेदयामि वासुदे - वाय किमप्यनुकूले ॥
४ ॥ गृहीत्वा पुराणपृथुकमुष्टिं - गृहिणीदत्तं सद्यः ।
प्रहृष्य रथमारुह्य प्रययौ - भागवतोऽप्यनवद्यः ॥
५ ॥ चातुर्वर्ग्यप्रसाधनं स - म्प्रयाति स्म हरियाणम् ।
भूतले जले वियदि ततानोऽ - भूतपूर्वप्रयाणम् ॥

२८८. सूक्ष्मं स्थूलं ऋजुं वक्रं स्निग्धं बर्बरमैक्षत ।
विपरीतं वस्तुतत्वं कुचेलो रथविभ्रमात् ॥

२८९. कीर्तयन्विष्णुमाहात्म्यं क्षणाद्द्वारवतीं ययौ ।
तमवारूरुहत्कृष्णस्समाश्लिष्य स्वयं रथात् ॥

२९०. रत्नसिंहासने कृष्णः कुचेलमुपवेशयन् ।
संवाहयंस्तस्य पादौ बाल्यस्नेहात्समालपत् ॥

In Public domain. Digitization Muthulakshmi Research Academy

बेहाग् - रूपकः ।

उ ॥ त्वया किमानीतं मे - प्रसादं तव ।
ध्रु ॥ दयानिधे दर्शय त - द्बाल्यसचिव ॥ ॥त्व॥
१ ॥ स्मरसि किमस्मच्चरितं - सकाशं गुरोः ।
दुरितलतात्सरोश्श्रित - स्तोमसुरतरोः ॥ ॥त्व॥
२ ॥ वरकाशीसुभिक्षया - वर्ततेऽद्य किम् ।
स्थिरसुव्रतशाधि मां त्व - दीयकिङ्करम् ॥ ॥त्व॥

२९१. भवदागमेन सम्प्रति ।
सफलं मम जन्म भवनमपि पूतम् ।
किंकरवाण्याज्ञापय ।
भागवतोत्तम निरीह बाल्यसखे ॥

२९२. वदन्तमिति गोविन्दं वीक्ष्यानन्दाश्रुसप्लुतः ।
कुचेलोऽकीर्तयद्भक्त्या कृष्णमाश्रितवत्सलम् ॥

हिन्दुस्थानी भैरवी - एकः ।

उ ॥ हरे कृष्ण गोविन्द मुरारे - स्वाश्रितकष्टहरे नरहरे ।
ध्रु ॥ पुरुषोत्तम नारायण शौरे - भूम्युद्धारकिरे धृतगिरे । ॥हरे॥
१ ॥ त्वां सर्वज्ञं जानाति कथं - भवाधीनदेही धृतारे ।
संसारिणो भवत्येव वृथा - शाश्वतसौख्यकथा कंसारे ॥ ॥हरे॥

२९३. कर्ता भोक्ता प्रयोक्ता - त्रिभुवनकरणं - कर्महेतुस्त्वमेव ।
त्वत्तोऽन्यन्नास्ति किञ्चि - त्सकलमपि मृषा - स्वप्नवद्विश्वमेतत् ।
त्वन्मायापञ्जरस्थः - करटिरिव वृथा - मोक्तुकामायतेऽहं ।
खिन्नं मां पाहि विष्णो - भवभयचकितं - कौस्तुभालङ्करिष्णो ॥

In Public domain. Digitization Muthulakshmi Research Academy

२९४. नित्यलक्ष्मीनायकोऽपि पूर्णकामोऽपि याचसे ।
अकिञ्चनं मां गोविन्द किमाश्चर्यमितःपरम् ॥

२९५. इत्यालपति कुचेले ।
तच्चीवरगुप्तपृथुकमास्वाद्य ।
गोविन्दोऽदात्तस्मै ।
भक्तायाभीष्टसम्पदं सद्यः ॥

२९६. कुचेलः स्वगृहं प्राप्य चरति स्म यथासुखम् ।
इदं वाक्यं सत्यमेव नादत्तमुपतिष्ठति ॥

२९७. पत्रं पुष्पं फलं तोयमपि चेद्विष्णवेऽर्पितम् ।
भवत्यभीष्टसम्पत्यै कुचेलपृथुकं यथा ॥

२९८. परमात्मा वासुदेवः सच्चिदानन्दविग्रहः ।
जगन्मयस्तस्य लीलां शिवो जानाति वा न वा ॥

मञ्जरी - झञ्झाटि - चतुरश्रः ।

१ ॥ कृष्णमहिमजिज्ञासुर्नारद - ऋषिर्द्वारकां गत्वा ।
तृष्णारहितोऽपि विस्मितोऽभू - दीषत्तामीक्षित्वा ।
२ ॥ द्वारवती प्रकृतिर्यथार्थतः - स्वर्गपुरीविकृतिः ।
द्वारकानगर्या नूनं वि - श्वमखिलं प्रतिकृतिः ॥
३ ॥ द्वारवती त्रिभुवनसारः स - र्वजगत्कारणरूपम् ।
द्वारकामृतद्वीपं भागव - तहृदयशाश्वतदीपम् ॥
४ ॥ द्वारवती वैष्णवैकगम्या - परमतपोधनवेद्या ।
द्वारकापुरी किंबहुना प - द्मनाभबोधकविद्या ॥

२९९. प्रफुल्लकमलाकारा नौकेव प्लवतेऽबुधौ ।
कृष्णलीलाविरचिता द्वारकाकामरूपिणी ॥

In Public domain. Digitization Muthulakshmi Research Academy

३००. वैष्णवैकशरण्या सच्चिदानन्दस्वरूपिणी ।
साक्षाद्वैकुण्ठनगरी द्वारकैव न संशयः ॥

३०१. सर्वेऽपि विष्णुभक्ताः ।
सर्वेऽप्यनिशं स्वतन्त्रसञ्चाराः ।
जीवन्मुक्ताः सर्वे ।
ऽप्यहो बत द्वारकापुरीमहिमा ॥

३०२. प्रविश्य द्वारकां देव मुनिर्भागववोत्तमः ।
वादयन्महतीमुच्चैः कृष्णमित्थमकीर्तयत् ॥

अमृतलहरी - चतुरश्रः ।

उ ॥ पाहि मां पाहि दयानिधे कृष्ण - वासुदेव पार्थसारथे कृष्ण ।
ध्रु ॥ पाहि मां पाहि रमाधवकृष्ण - प्रद्युम्न नरसिंह केशव कृष्ण । ॥पा॥
१ ॥ देहि मे ते दिव्यदर्शनं कृष्ण - दीनरक्षाकरस्पर्शनं कृष्ण ।
एहि गोविन्द जनार्दन कृष्ण - हृषीकेश पापमर्दन कृष्ण ॥ ॥पा॥

३०३. विश्वमेतन्न वि - भिद्यतेत्वत्तो य - थार्थतस्तेजस्स - दार्कत इव ।
जगदुद्भवस्थिति - संहारकारण - मखिलं त्वमेव वेदान्तवेद्य ।
त्वां शिवो जानाति - वा न वा मादृशः - का कथाम्बुजनाभ - कौस्तुभाङ्क ।
सर्वभूतसमस्य - सत्यदयापर - तन्त्रस्य गृहिणः स - तःपतिरसि ।

जातु न हि भवतापः प्र - शाम्यति मम ।
तावकीनकटाक्षामृ - तं विनैव ।
पाहि मां तव दर्शनं - देहि मेऽद्य ।
हे जगन्नाथ संश्रित - हृद्विबोध ॥

In Public domain. Digitization Muthulakshmi Research Academy

खन्नडा - खण्डः ।

उ ॥ अहो तव सुदर्शनम - नन्तसमभूदिद ।
ध्रु ॥ महाद्भुतमपूर्वमहि - मप्रभावास्पदम् । ॥अहो॥
१ ॥ अवाङ्गनसगोचर - महत्वहेतो ।
भवाम्बुनिधिसन्तरण - भव्यसेतो ॥ ॥अहो॥
२ ॥ त्वमेव सकलं जगदि - दमपि गोविन्द ।
रमाधव मुकुन्द ना - रायण सदानन्द ॥ ॥अहो॥

३०४. अनन्तनामरूपैस्त्वं क्रीडसीत्थं स्वमायया ।
जानन्नपि न जाने त्वां लीलामानुषविग्रह ॥

३०५. गोविन्द सच्चिदानन्द सृष्टिस्थितिलयात्मक ।
चित्रं त्वच्चरितं कृष्ण त्वं प्रत्यक्षोऽप्यतन्द्रियः ॥

दण्डकम् ।

जयजयदामोदरश्रीधरां - भोजनाभासुरेभाढ्यहर्याभ - विष्णो रमालङ्करिष्णो - हृषीकेश सत्यप्रकाशा - निरुद्धामलस्वान्तसम्बद्ध - सङ्कर्षणाभील तापत्रयाग्नि प्रतप्ताश्रिताह्लादसन्धायकांचत्सुधावर्षणो - पेन्द्र शश्वद्दयासान्द्र - नारायणप्राज्य वेदान्तपारायणा - धोक्षजप्रस्फुरद्यादवाध्यक्षजा - द्य प्रभोभो - नृसिंहस्मयोद्यन्मदक्रूर रक्षश्चमूमारणामोघरंह - त्वदीयं चरित्रं विचित्रं त्रिणेत्रोऽपि वेत्तुं न शक्नोति संसारिणः का कथा हन्त शश्वद्भवन्मायया भ्राम्यमाणस्य विज्ञानलेशावभासावलिप्तस्य मर्त्यस्य मोहाब्धिनिर्मग्नचित्तस्य कर्तव्यतामूढभावस्य मिथ्यादृशोऽश्रद्धधानस्य विश्वासहीनस्य कुक्षिम्भरेः पण्डितम्मानिनः क्षुद्रचेष्टस्य दुस्तन्त्रनिघ्नस्य दम्भात्मनः पामरस्यातिलुब्धस्य दुर्व्याधिसम्पीडिताङ्गस्य नष्टायुषः कष्टजीवस्य - देवाधिदेवा - ष्टमूर्तेनवद्वारराजद्वपुर्द्वार-काशान्तकीर्ते - सहस्रीभवत्षोडशस्वच्छसम्पूर्णराकामृतांशु प्रभाकन्यकालोलगोपाल

In Public domain. Digitization Muthulakshmi Research Academy

- कृष्णासमुद्धूततृष्णा - खिलं विश्वमेतत्त्वमेवाप्रमेयत्रयीगेय - मां पाहि देहि त्वदीयाङ्घ्रि नीरेजसेवां सदा वासुदेवानु कम्पास्वभाव - क्षमाधार वन्दारुमन्दार - गोविन्द तुभ्यं नमः ॥

३०६. यद्यद्विभूतिम - द्विद्यते तत्तत्व - मेव गोविन्द - हरे मुकुन्द ।
दिशसि तटस्थोऽपि - देहिनः कर्मानु - सारतः फलमनि - शं नृसिंह ।
सन्तारयसि परान् - स्वयमपि तीर्णस्त्रि - भुवनगुरो साङ्ग - मूलपुरुष।
शश्वदाक्रीडसि - विश्वात्मनाद्विती - योऽपि नारायण - तापसेन्द्र ।

पाहि मामच्युतानन्त - वासुदेव ।
तावकपदाब्ज सेवामृ - तं प्रदेहि ।
पद्मनाभानिरुद्ध गो - पाल कृष्ण ।
हे जगन्नाथ संश्रित - हृद्विबोध ॥

३०७. षोडशसहस्रकन्याः।
षोडशसाहस्रविग्रहैस्तोषयसि ।
अष्टमहिषीभिरप्या ।
श्लिष्टोऽस्येकक्षणेऽप्यहो कृष्ण ॥

३०८. सगुणोऽपि निर्गुणस्त्वम् ।
सुश्यामलविग्रहोऽशरीरोऽपि ।
कार्यमपि कारणमभूः ।
कृष्ण त्वां वेत्ति कश्शिवेन विना ॥

३०९. कृष्णलीलामृतं पीत्वा नारदश्छिन्नसंशयः ।
वासुदेवस्सर्वमित्याकार्षीद्गोविन्दकीर्तनम् ॥

३१०. नृणामवश्यकर्तव्यधर्मः केशवकीर्तनम् ।
सौभद्र भज गोविन्दमिति वैयासकिर्जगौ ॥

In Public domain. Digitization Muthulakshmi Research Academy

३११. सौभद्रोऽपि हरिकथा ।
मृतपा नेनैव गलितभवरोगः ।
कैवल्यानन्दमवा ।
प्रोद्गोविन्दं भजन्दिवारात्रम् ॥

३१२. हरेः कथासुधासारे धर्मसंस्थापनं कृतम् ।
श्रीनारायणदासेन कवितागानशालिना ॥

सुरटः - चतुरश्रः ।

उ ॥ मङ्गलमस्तु रमाधव ते - मन्दरधृते विकुण्ठपते ।
ध्रु ॥ गङ्गाधरनुतनामतते - कामितार्थकल्याणकृते ॥ ॥मं॥
१ ॥ नारसिंह गो - विन्द गोपाल ।
नारायण दा - सावनलोल ॥

श्री हरिकथामृतं सम्पूर्णम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

अक्षरक्रमानुगतश्लोकसूची

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
अक्रूरो नयति श्रीशं मधुरामिति गोपिकाः ।	१६४	60
अतुलसुखदं राज्यैश्वर्यं - धुनोति तृणं यथा ।	१४	7
अत्रान्तरे तेन दृष्टः समीपे सत्फलेन्धनम् ।	९१	30
अद्य जाता सहास्माभिः सम्पूता मधुरापुरी ।	१७६	64
अथ कंसो महावीरो वसुदेवं स देवकी ।	५९	20
अथ किरातपतिर्ज्वलितानलम् ।	८८	29
अथ नन्दसती हठात्प्रचण्ड ।	१३०	45
अनन्तनामरूपैस्त्वं क्रीडसीत्थं स्वमायया ।	३०४	95
अन्तर्दृष्ट्यात्मानमेव तेजश्चक्रमिवेक्षते ।	२०६	74
अन्नपानातुरान्पुत्रान्दयालो परिपालय ।	२८१	89
अपहर्तुं तां निन्दाम् ।	२३२	79
अभिनवयौवनपल्लव ।	२१	9
अभूतपूर्वचारित्रं - चाणूरो वीक्ष्य बालकम् ।	१८८	68
अमानुषं चित्रचरित्रमेतयो ।	२३२	79
अलकभ्राजितमिन्दुबिम्बसदृशं - हासप्रभोद्दाममु ।	१६०	58
अलं श्रमेणाततलोललोचने ।	२७३	87
अविद्यानिद्रया जन्तुर्भवस्वप्नं प्रपश्यति ।	२०१	74
अशक्तं रोदितुमपि मरणे कृतनिश्चयम् ।	८३	28
अष्टादशपुराणानि प्रोक्तानि गुरुणा मम ।	४४	15
अस्मानुद्वाहयास्माकमवित्वा जीवितेश्वरम् ।	१४७	52

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
अस्वाद्य नन्दसूनो ।	१४०	50
अस्ति नास्तीति सन्देहाकुलो भवति तार्किकः ।	१०९	36
अहिंसा परमो धर्म इति ज्ञात्वा कपोततः ।	७७	26
अहो प्रह्लादनाम्नैव - हन्यन्ते पापकुञ्जराः ।	१५	7
अहं ममेति विभ्रान्त्या देही सङ्क्षुभ्यते भृशम् ।	२८५	90
अंसराजितकुम्भीन्द्रदन्तौ तौ बलकेशवौ ।	१८६	68
आगच्छन्तं शूलमुद्वीक्ष्य शौरि ।	२६६	86
आजानुबाहुमरविन्ददलायताक्षम् ।	२३९	80
आज्ञापितोऽक्रूर इति व्रजन्व्रजमुदारधीः ।	१५९	57
आत्मन्येवा - विद्यया स्वप्नवस्तु ।	२०७	74
आत्मवशाद्भ्रमतिमन ।	२१८	77
आत्मैवेदं सर्वमिति शान्तचित्तो भवानिशम् ।	२१४	76
आनन्दबाष्पपूरं ।	४१	14
आवयोर्द्वापरे मल्ल साम्परायो भविष्यति ।	२४८	82
आश्चर्यमाश्यर्यमहोमदिष्ट ।	८९	30
आश्चर्ययुक्तो निर्विण्णमानसो जाम्बवांस्तदा ।	२४७	82
आहूतो नगरं प्रयाति सहसा - बालाः कथम्मे स्मरात् ।	१६५	60
आह्वय स्वधनुर्यागं वीक्षितुं बलकेशवौ ।	१५७	57
इति निगदितवत्यां - तत्क्षणेऽन्तर्हितायाम् ।	१२७	44
इति निरन्तरभावनया जग ।	२१३	76
इति प्रार्थयन्तं - लसद्भक्तिमन्तम् ।	४०	14

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
इति ब्रुवाणं मौनीन्द्रमभिमन्यात्मजोऽवदत् ।	९५	31
इति श्रीकृष्णचरितमिच्छन्तं कुरुभूपतिम् ।	९७	31
इत्यक्षिकोणपरिपूर्ण शुगश्रुजालम् ।	२३	10
इत्यालपति कुचेले ।	२९५	93
इत्युक्तवन्तः परमेश्वरेण ।	५३	17
इत्युक्तवन्तं गोविन्दमक्रूरः प्रत्यभाषत ।	१७४	63
इत्युक्तवन्तं मुनिपुङ्गवं तं ।	२७	11
इत्युदन्तीं प्रियामाह कुचेलो वैष्णवाग्रणीः ।	२८२	89
इत्थं बद्धाञ्जलिपुटावद्भुताह्लादसंयुतौ ।	११४	39
इत्थम्मया विरचितं पितृबन्धविमोचनम् ।	१९५	71
इत्थं वदन्त्यै गोविन्दो शार्ङ्ग मन्दं हसन्ददौ ।	२७०	86
इत्थं वदन्तं भोजेन्द्रं मञ्चादाकृष्य केशवः ।	१९०	70
इत्थं वदन्तं शुकतापसेन्द्रम् ।	७४	26
इत्थं वदन्देवदेवः सामान्यार्भकवत्स्थितः	११७	39
इत्थं वदन् स भिल्लेशः प्रभाते स्वगृहं ययौ ।	९४	31
इत्थं स्तुवन्तं नागेन्द्रं सदयो हरिरब्रवीत् ।	१४८	53
इहपरसौख्यद्वारम् ।	१६	7
इहैवोपाविक्ष - त्प्रतिफलितजामीफलमसौ ।	१३१	46
ईश्वरभक्त्या पूतम् ।	१७	8
उदित्वेत्थं हृषीकेशो जाम्बवत्कन्यकां पुरः ।	२४१	81
उपनीतौ बलकृष्णौ ।	२२८	78
एकेन हस्तेन गलं गृहीत्वा ।	१४५	51

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
एकोऽपि त्वं समस्तं-प्रभवसि भवितुं-स्थूलसूक्ष्मक्रमेण ।	१०१	33
कर्ता भोक्ता प्रयोक्ता - त्रिभुवनकरणं - कर्महेतुस्त्वमेव ।	२९३	92
कर्तास्ति किंवा ज - गत इति कृत्रिम	१०२	33
कतिपयकाले प्राप्ता ।	९८	31
कथकमणिश्शुकयोगी ।	३८	14
कथमेतत्सकलं चराचरमभू - त्केनापि दुर्बोधितम् ।	३०	11
कथमुपकरोम्येतं भीतं - किमद्य हि साधनम् ।	८४	29
कस्तेपे चिरकालदुस्तरतपः - कर्तुं हरिं स्वात्मजम् ।	५४	18
कारणं त्वं हि जगतो निर्गुणोऽपि विलासवान् ।	१०३	33
कालस्सन्निहितो मतिर्विचलिता - तक्षागमस्सूचितो ।	२८	11
किमसाध्यं भवत्पादभक्तस्य पुरुषोत्तम ।	२५२	83
किमिति त्वन्नामैषा ।	१३८	49
कियन्मात्रस्त्वं रे - नृपसदसि योद्धुं सह मया ।	१८९	69
कीर्तयन्विष्णुमाहात्म्यं क्षणाद्द्वारवतीं ययौ ।	२८९	91
क्रीडन्तमङ्गणे जानुचरं नन्दार्भकं हठात् ।	१२९	45
कुचेलः स्वगृहं प्राप्य चरति स्म यथासुखम् ।	२९६	93
कुलं पवित्रं भवदागमेना भवन्मदीयं सदनं प्रसिद्धम् ।	१७९	65
कृतवान्प्रदक्षिणमहं ।	२४०	80
कृतार्थोऽहं भवत्पाददर्शनेनास्मि सम्प्रति ।	२५३	83
कृष्णलीलामृतं पीत्वा नारदश्छिन्नसंशयः ।	३०९	96
कृष्णस्य भृत्यः सङ्गत्य यज्ञवाटीं कृताञ्जलिः ।	१५०	54
कृष्णस्य लङ्घनोत्पातवेगेन ह्रद एधितः ।	१४२	50

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
कंसोऽतिक्रूरहृदयः सद्योजातं तमर्भकम् ।	७३	26
कंसोऽपि देवमुनिना कथितं बलकृष्णयोः ।	१५६	56
कंसोऽपि दुस्वप्नशतानि पश्यन् ।	१८२	66
किं भ्रामयसि माम्भ - वाम्भोनिधि भ्रमे	२८७	90
क्षमेथां मामज्ञं - प्रकटदुरहङ्कारपिहितम् ।	६४	22
क्षुदादिवेदनाङ्गस्य स्वभावात्पीडते जनम् ।	२२४	78
क्षुधार्तवन्नोऽर्थयसेऽन्नमत्थिम् ।	१५२	55
गजं कुवलयापीडनामानं बलकेशवौ ।	१८४	67
गलितुं गरुडेन सहाथ हरिं ।	२६७	86
गीर्वाणौघः - पुष्पवृष्टिं ववर्षु ।	२७६	88
गुणवान्मूर्तिमान्मर्त्य इति त्वामिह मन्यते ।	१५४	55
गोविन्द सच्चिदानन्द सृष्टिस्थितिलयात्मक ।	३०५	95
गोविन्दनामस्तवनेन नित्यम् ।	२२२	77
घोरान्धकारभूयिष्ठां गुहां तीर्त्वा त्रिविक्रमः ।	२३७	80
चण्डप्लुतैर्भीतिवशाच्चलन्तम् ।	६८	24
जगत्सृष्टिस्थितिलयान् यथेच्छं कुरुते हरिः ।	२८३	90
जगतः कारणं कर्मफलदाता जनार्दनः ।	२७८	88
जघान बलरामोऽथ कृद्धान्राजानुजन्मनः ।	१९१	70
जननीजनकौ वृद्धौ ।	१९४	70
जपहोमव्रतैर्दानैस्तपसा न हि शक्यते ।	१०५	34
जपापुष्पच्छाया - मयमखिलवस्तुषु किरन् ।	६५	23
जरासन्धनृपं सप्त दशवारं विजित्य तौ ।	२२९	78

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
जानामि शास्त्रतः	१७१	63
जिह्वासाफल्यं किम् ।	२२०	77
ज्ञानेन मोक्षमाप्नोति भक्तिर्ज्ञानाय कल्पते ।	२०३	74
तच्छ्रुत्वा मुरदानवः प्रचलयन् - कुप्यन् शिरःपञ्चकम् ।	२६५	86
तत्र मृगयाभिलाषी ।	७८	27
तदा ब्रह्मादिदिविजाः क्रमशो विष्णुकीर्तनम् ।	१००	32
तदा वैयासको विष्णुकथाकथनलालसः ।	१४१	50
तदा शुकः प्रत्यवादीत्कालनेम्याख्यराक्षसः ।	७५	26
तदा शुकपरिव्राजा राजा सन्दिग्धमानसः ।	३०	12
तदा हठान्नीलपयोदपङ्क्तिरुत्थाय गाढान्धतमः किरन्ती ।	७९	27
तद्विहरणैः प्रमुदिता ।	१३४	47
तपःफलं नन्दयशोदयोश्श्री निकेतनं योगिमनःप्रदीपः ।	१७५	64
तमङ्घ्रिद्वन्द्वेना - सकृदपि तुदन्दन्तयुगलम् ।	१८५	68
तवाप्येकानुजां बालां त्वय्यपि प्रेमविह्वलाम् ।	६१	22
तवैकादशपुत्रेषु - ज्येष्ठ एकादशाब्दिकः ।	२८०	89
तस्मात्प्रज्ञानवैराग्यभक्तितत्वान्यवाप्नुहि ।	३३	12
तस्याजनिष्ट कंसाख्यो दुर्जय्यो लोककण्टकः ।	५६	18
तस्यां यादवपुङ्गवः पतिरभू - न्नाकाधिपप्राभवः ।	५५	18
तस्मिन्निशीथसमये वसुदेवपत्नी ।	९९	32
तारतम्यं ज्ञास्यसि त्वं - तव रामस्य सम्प्रति ।	२४४	82
तेजःपूर्ति - र्निर्गुणो निर्विकारः ।	२१२	75
तृष्णोपशमनार्थं त्वं कृष्णनामामृतं पिब ।	२८६	90

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
त्यक्तुं राज्यमशेषनाकपदवी - तुल्यं बुधैः पालितम् ।	२०	9
त्रेतायां सचिवोऽभूर्मे श्वशुरोऽद्य महामते ।	२५६	83
त्रिविष्टपमुपप्लुतं	२५९	84
त्रिभुवनाधार रुक्मिणी - हृदयचोर ।	२८७	91
त्रिभुवनमिदं दुःखपायं	२७४	87
त्रियामायामस्यां - व्रजमुपगतं मां प्रणमितं ।	१६१	58
त्वत्पादकमलसेवां ।	१८१	65
त्वत्सङ्गमोत्सुकैषा मे पुत्रिका तप्यते तपः ।	२५१	83
त्वदाश्रितजनं क्वापि न कथञ्चिद्भयं स्पृशेत् ।	२६३	85
ददीक्षमाणो नरकासुरोऽपि।	२६९	86
दनुजारिरवातरद्धरण्याम् ।	१५८	57
दयासमुद्रस्सर्वेश आर्तजन्तुहृदि स्थितः ।	८६	29
दरितुं पातयितुं स	२४६	82
दुश्शीतवर्षनिहतं तव नैजशत्रुम् ।	९३	31
दृष्वा दृष्ट्वा भृशं व्याधः करेण विहगोत्तमम् ।	९२	30
देवकी प्रासूत सूनुं रम्भारम्याङ्कुरं यथा ।	७२	25
देवकीवसुदेवौ त - त्कारागारनिवासिनौ ।	१२२	42
देहप्रकृतिमाश्रित्य व्यक्ताव्यक्तविभेदतः ।	२५	10
धनमतिबलनाशं - कुर्वते दुष्टनार्यो ।	१३	7
न श्रोत्रं विष्णुनाम - श्रवणविरहितं - किन्तु मृत्कुड्यरन्ध्रम् ।	११	6
न सा भवतु शून्यवाक्	६२	22
नटाकारौ धीरौ - भुवनशुभकारौ मणिमयो ।	१८७	68

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
नन्दात्मजां समाकृष्य तत्स्थाने मां निवेशय ।	११६	39
नहि वेद्म्यहं स्तन - न्धयदशायाम्मदी	११०	36
नरकासुरपत्तनोर्ध्वदेशे ।	२६४	85
नरेश्वरं द्रष्टुमिहागता वयं बृन्दावनाद्भूमिपभागिनेयाः ।	१७७	65
नवभक्तिविधानेषु मुख्ये श्रवणकीर्तने ।	२१७	76
नवभक्तिविधानैः स सेवते स्मानिशं हरिम् ।	२७९	89
नश्यामीति नरेन्द्र किञ्चिदपि मा - भैषीरलङ्घ्या मृतिः ।	३४	13
नाकाङ्क्षति त्रिदिवराज्यरमाधिपत्यम् ।	१४६	52
नात्मनोऽन्यत्किञ्चिदपि वस्त्वस्ति परमार्थतः ।	२०९	75
नातिदूरं तोयमस्ति किमालस्यं कृतं त्वया ।	१७३	63
नारायणं कृपाम्भोधिमार्तत्राणपरायणम् ।	२६१	85
नारायणं स्वीयपुत्रं निजरूपविभासुरम् ।	११२	37
नास्त्यद्य वर्षबाधा ।	८२	28
निजस्वसारं परिपूर्णगर्भिणीम् ।	७१	25
नित्यलक्ष्मीनायकोऽपि पूर्णकामोऽपि याचसे ।	२९४	93
निखिलपुरुषार्थहेतो ।	१९३	70
निबिडं कबरीबन्धं कृत्वा काञ्चीं दृढं समाबध्य ।	२७१	86
निर्मथितनिगमसिन्धुम् ।	४३	15
निरर्थकं तस्य जन्म दीनान्नोपकरोति यः ।	८७	29
निशम्य त्वद्बृन्दा - वनगमनवार्तां विमनसौ ।	१६२	59
निष्कण्टकः समतलः ।	१८३	66
नृणामवश्यकर्तव्यधर्मः केशवकीर्तनम् ।	३१०	96

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
पक्षिणः कोटरं कुञ्जं मृगान्सत्वान्गुहोरगान् ।	८१	28
पत्रं पुष्पं फलं तोयमपि चेद्विष्णवेऽर्पितम् ।	२९७	93
पल्लवगृहनवनीतम् ।	१३५	47
परमात्मा वासुदेवः सच्चिदानन्दविग्रहः ।	२९८	93
पश्य प्रियस्स एव ।	१७०	62
पातुं भक्तान्दुष्टान् ।	२६०	84
पाहि प्रसन्नरू-पदयाकलापस-त्यालापसर्वलो-कैकदीप ।	४९	16
पुरा परिक्षितं कृष्णकथाश्रवणलालसम् ।	२२७	78
पुराणं श्रीभागवतं द्वादशस्कन्धभूषितम् ।	४६	16
प्रत्यक्षो भवति भवा ।	१९७	72
प्रविश्य द्वारकां देव मुनिर्भागववोत्तमः ।	३०२	94
प्रफुल्लकमलाकारा नौकेव प्लवतेंऽबुधौ ।	२९९	93
प्रवृद्धार्केन्दुकिरणैः परिपूर्णं दिगन्तरम् ।	६७	23
प्राचीनं स्व - च्छन्दपालनाढ्यम् ।	७	4
प्राप्ताश्चर्य - श्शूलमुद्दृह्य कृष्णम्	२७५	87
बालः कोऽपि ह्रदम्मेऽ ।	१४३	50
बलराम इति ज्येष्ठं कनिष्ठं कृष्ण इत्यसौ ।	१३३	46
बलराम उपायंस्त रेवतीं मधुसूदनः ।	२३१	78
बला वीकीर्णचिकुरा विवशाः कपोल ।	१६९	61
बहवस्तत्सुताः क्रुद्धा राक्षसा भीमविक्रमाः ।	२६८	86
वहुकरुणारसभरितम् ।	६३	22
बाल्ये वयसि सर्व - वस्तुषु महिमान	१११	37

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
ब्रह्मैव भवति ब्रह्मविदिति श्रुतिरब्रवीत् ।	२११	75
भक्त्येत्थं कृष्णजननकथाविरचिता मया ।	११८	39
भक्तिप्राशस्त्यमित्थं वदन्तं शुकयोगिनम् ।	३७	13
भक्षितशेषंकिञ्चि ।	१३६	48
भवदागमेन सम्प्रति ।	२९१	92
भवेम हरिपादाब्ज - युगलीनिगलीकृताः ।	१६८	61
भवायतिर्मरीचिकैव दृश्यते भ्रमात्मिका ।	१२	6
भूगोलस्येकार्धे ।	६६	23
भूनाथो मखमीक्षितुं सपदि नः - कंसः समाज्ञप्तवान् ।	१६३	60
भो मातापितरौ कंसं प्रहणिष्यामि बन्धनात् ।	११५	39
भोभो मोक्षासक्ता ।	१०	5
भ्रष्टं कन्दुकमिति ते ।	१३९	49
मदन्यःकोऽपि देवोऽस्ति किमित्यब्जाक्षी ते सुतः ।	१३७	48
मधुरं देवि करुणया ।	१९९	73
मया यो वीक्षितस्स्वप्ने स एवैष न संशयः ।	२४२	81
महिमानं हरेर्ज्ञातुं क ईष्टे पाण्डवोत्तम ।	२५७	84
महेन्द्र एकदा कृष्णं द्वारकानगरस्थितम् ।	२५८	84
मानयेथा वृथाकालमस्थिरेऽवशजीविते ।	१९	8
मानुद्वाहयास्माकमवित्वा जीवितेश्वरम् ।	१४७	52
मायामानवविग्रहेण हतवा - न्दैतेयसङ्घं पुरा ।	२५०	83
मा नैषीर्दूरममुमित्यक्रूरं प्रार्थयामहे ।	१६७	61
मा मामेति निवारिता अपि वयं - भ्रात्रादिभिर्बान्धवै ।	१५३	55

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
माकार्षीस्त्वं क्रतुमुख ।	२२३	78
मृदःकुम्भो यथा भिन्न स्तथैव हरितो जगत् ।	२०५	74
मोचयित्वा बन्धनानि देवकीवसुदेवयोः ।	१९२	70
मैनां वधीः सपदि माञ्जहिदुर्दशां ते ।	१२५	43
यत्कृतं - जननचालनशीत्कृतम् ।	३६	13
यथा कुरूपीति विदन्नपि स्वयं विनोदयत्यल्पमतिः सदर्पणे।	५	3
यद्यद्विभूतिम - द्विद्यते तत्तत्व ।	३०६	96
यद्यवकाशः प्राप्तः ।	५२	17
यद्वस्तुतत्वं सुधियोऽप्यवेद्यम् ।	५०	16
यमुनाजलतश्चक्री बभूवान्तर्हितस्तदा ।	१७२	63
यशोदाशिशवे स्तन्यं ददत्यस्सास्यगह्वरे ।	१३२	46
यस्य स्मरणं - भवभयहरणम् ।	३९	14
यस्य सङ्कल्पमात्रेण लोकसृष्टिस्थितिव्ययाः ।	११३	39
यस्त्रैलोक्यविभुर्यमाश्रयपदं ध्यायन्ति सर्वे बुधा	२	1
रत्नसिंहासने कृष्णः कुचेलमुपवेशयन् ।	२९०	91
राजा राज्यमुपेक्ष्य दुष्टसहितो - वाराङ्गनाः सेवते ।	६	4
रामो नचेदयं साक्षान्मद्बलं सहते कथम् ।	२४९	82
रे मायिन् क्षत्रबन्धो - यवननरपति - र्वेत्ति ते शौर्यसारम् ।	२४३	81
रे मानुषत्वमतिनीचः सदासिकृत - भोगोऽपि दुष्टवशतो ।	१८	8
रे रे मूढमनस्क कंस किमति - प्रेम्णा स्वसारं वृथा ।	६०	21
रेरे कंस नृशंस मूढ न हि तेऽ - हम्मृत्युहेतुर्वृथा	१२६	44
लक्ष्मीनाथं नृहरिं ।	१९६	72

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
लीलामानुषविग्रहेण धरणी - मागत्य दुष्टासुरान् ।	५१	17
लीलामानुषरूपे ।	२४५	82
वक्ता श्रोतापि कृतिनौ कथया भवतो हरेः ।	४२	15
वचनमपि न - श्श्रोत्रानन्दं - वदेत्क इतःपरम् ।	१४४	51
वदन्तमित्थं चतुरं कृताञ्जलिम् ।	२५५	83
वदन्तमिति गोविन्दं वीक्ष्यानन्दाश्रुसप्लुतः ।	२९२	92
वन्दे मुकुन्दमाश्रित ।	११९	40
वन्दे संश्रितकल्पम् ।	१	1
वन्दे सारससन्निभाक्षियुगलां - वन्दारुमन्दारिकां ।	४	2
वन्दामहे सकलशक्तिमजम्महेशम् ।	४८	16
वर्णास्सङ्कुलिताश्श्रियो विचलिता - वेदाःपरीभाविता ।	८	4
वर्षोपलविशीर्णाङ्गो दुश्शीताम्बुहतः पुनः ।	८०	27
वसुदेवः सन्निनाय - स्ववशदयितया	७०	25
वापीकूपतटाकपर्वतझरी - कासारसंशोभितम् ।	२३८	80
वायकायाथ सन्दायाभीष्टैश्वर्यं दयाम्बुधिः ।	१७८	65
वासुदेवः सर्वमिति यावद्भवति भावना ।	२२१	77
वासुदेवादन्यवस्तु मिथ्यैव व्योमनैल्यवत् ।	२८४	90
विचिन्तयन्नत्र समन्दमन्दम् ।	९०	30
विस्मित्य बालिकां दृष्ट्वा हन्तुं तामपि निर्दयः ।	१२४	43
विपन्नमेनं दृष्ट्वा मे क्षुभ्यते हृदयं भृशम् ।	८५	29
विमलज्योत्स्नापूरः ।	६९	25
विस्रब्धो भव सर्वशक्तिनिभृतः - सर्वेश्वरोऽस्तीति तम् ।	३२	12

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
विश्वमेतन्न वि - भिद्यतेत्वत्तो य	३०३	94
विकीर्य बाणान्दशदिक्षु भामा ।	२७२	87
वेदमुखेन प्रवदति ।	२१९	77
वेदात्मयुताराजित ।	१२१	41
वैराग्येणाथवा भक्त्या कैवल्यं प्राप्तुमर्हसि ।	२१५	76
वैष्णवैकशरण्या सच्चिदानन्दस्वरूपिणी ।	३००	94
व्यथयति मां भवपाश ।	२९	11
शाश्वतैश्वर्यमाप्नोषि स्मर कृष्णं निरन्तरम् ।	२२६	78
शाश्वतोऽहमिति ज्ञानं संश्रिताय ददाति यः ।	४६	16
शास्त्रं गभीरं प्रमदं कवित्वम् ।	४५	15
शुकमिव सुमं शाल्मल्याः स्त्री - प्रभृत्यखिलं धनम् ।	२००	74
श्रद्धया लभते भक्तिं भक्त्या मोक्षं प्रविन्दति ।	२१६	76
श्रेष्ठं भवति गार्ह्यस्थ्यमाश्रमेष्वखिलेष्वपि ।	२२५	78
श्रुत्वा शिशोरुदितमप्यतिवेगवन्ता ।	१२३	43
षोडशसहस्रकन्याः ।	२७७	88
षोडशसहस्रकन्याः।	३०७	96
सकलजगत्सृष्टिस्थिति ।	१९८	73
सकलसुरनिकायवन्दनीयम् ।	३	2
सगुणोऽपि निर्गुणस्त्वम् ।	३०८	96
सङ्गतं - सततजीवनमुक्तवशङ्गतम् ।	२२	9
सतटिदभिनवाभ्र - श्यामलः पीतवासाः ।	१५१	54
सत्यमनन्तं - समधिकमहिम	१०६	35

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
सत्यं पातिव्रत्यं ।	९	5
सत्स्वपि धान्यादिषु सं ।	७६	26
सत्राजिदनुजं हत्वा वने सिंहो शमन्तकम् ।	२३३	79
सत्राजिद्भ्रातरं हत्वा कृष्ण एव शमन्तकम् ।	२३४	79
सदा समस्तं त्रैलोक्यं विद्वान्मिथ्येति संस्मरन्	१०७	36
सदा सुभक्तश्रुतिभूषणानि ।	९६	31
सन्ततं शत्रुसुगमं विहाय मधुरापुरम् ।	२३०	78
समस्तजगदाधार सच्चिदानन्दविग्रह ।	२५४	83
सर्वेऽपि विष्णुभक्ताः ।	३०१	94
सर्वधर्मस्थापनाय यदि भूमाववातरत् ।	१५५	56
सहचरकथितोदन्तं ।	१४९	54
स्थूलां सूक्ष्मां गतिं सर्वं वस्त्वाप्रोत्यनिशं द्विधा ।	२४	10
स्याद्राज्यं स्वर्गतुल्यं - विरहितसकल - ज्ञातिवैरं सुधर्म्यम् ।	३५	13
स्वच्छन्दराज्यं रतिराजरूपम् ।	५८	20
स्वच्छायां दर्पणे पश्य न्युध्यते चटको यथा ।	२०८	75
स्वस्मै हित्वा क्रूरनाम चक्रिं दूरं नयत्यसौ ।	१६६	60
सा बाला परमेशभक्तिनिरता - जागर्ति पद्मैस्सह ।	५७	19
सामीप्यं स्याद्दूरमेव मार्गाणां गतिभेदतः ।	२६	10
सात्विकाहारनिरतः सर्वभूतदयापरः ।	२०४	74
सितसरसिजा - भं ते नेत्रं - कथं युधि रज्यते ।	२६२	85
सुदामदत्तमालाभिर्भूषितो मधुसूदनः ।	१८०	65
सूक्ष्मं स्थूलं ऋजुं वक्रं स्निग्धं बर्बरमैक्षत ।	२८८	91

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकः	श्लोकसङ्ख्या	पुटसङ्ख्या
सौभद्रोऽपि हरिकथा ।	३११	97
संवर्ध्यमानतृ - ष्णारुजाक्रान्तव	१०४	34
हतं प्रसेनं तुरगं मृगेन्द्रम् ।	२३६	79
हन्मि शत्रून् शत्रुणापि हन्येऽहमिति बालकः ।	१२८	44
हरिभक्तिनौकयैव ।	२०२	74
हरिरात्मैव तद्ध्यानं भक्तिरित्यभिधीयते ।	२१०	75
हरेः कथासुधासारे धर्मसंस्थापनं कृतम् ।	३१२	97
हव्यं कव्यं गव्यं । नव्यं प्रापयसि भक्तसङ्घेभ्य ः ।	१०८	36
हेरम्बसंश्रित समूहदयावलम्ब ।	१२०	41

In Public domain. Digitization Muthulakshmi Research Academy

अक्षरक्रमानुगतवृत्तसूची

१. इन्द्रवज्रा - 45, 50, 53, 58, 68, 89, 182

२. उपजातिः - 27, 39, 71, 74, 75, 77, 79, 90, 96, 130, 145, 152, 158, 175, 179, 232, 236, 255, 269, 272, 273

३. कोरकम् - 3

४. गीतिः - 1, 9, 10, 16, 17, 21, 29, 38, 41, 43, 52, 63, 66, 69, 78, 82, 98, 119, 121, 134, 135, 136, 138, 139, 140, 143, 149, 170, 181, 183, 193, 194, 196, 197, 198, 199, 202, 218, 219. 220, 223, 228, 235, 240, 245, 246, 260, 277, 291, 295, 301, 307, 308, 311

५. तन्वी - 106

६. तोटकम् - 267

७. दण्डकः - पृ.सं. - 38, 95

८. द्रुतविलम्बितम् - 88, 213

९. पञ्चचामरः - 12

१०. पृथ्वी - 62, 259, 264

११. फलवृत्तम् - 7

१२. भुजङ्गप्रयातम् - 40

१३. मत्तेभम् - 18

१४. मत्तेभविक्रीडितम् - 30, 160

१५. महास्रग्धरा - 70

१६. माधवीवृत्तम् - 36

In Public domain. Digitization Muthulakshmi Research Academy

१७. मालिनी - 13, 127, 151

१८. वसन्ततिलका - 23, 48, 93, 99, 122, 123, 125, 146, 169, 239,

१९. वंशस्थम् - 5

२०. शार्दूलविक्रीडितम् - 2, 4, 6, 8, 20, 28, 32, 34, 51, 54, 55, 57, 60, 126, 131, 153, 163, 165, 238, 250, 265

२१. शालिनी - 207, 212, 266, 275, 276

२२. शिखरिणी - 64, 65, 161, 162, 185, 187, 189

२३. श्लोकः - 15, 18, 24, 25, 26, 31, 33, 37, 42, 44, 46, 47, 56, 59, 61, 67, 72, 73, 80, 81, 83, 85, 86, 87, 91, 92, 94, 95, 97, 100, 103, 105, 107, 108, 109, 112, 113, 114, 115, 116, 117, 118, 122, 124, 128, 129, 132, 133, 137, 141, 142, 147, 148, 150, 154, 155, 156, 157, 159, 164, 166, 167, 168, 172, 173, 174, 176, 177, 178, 180, 184, 186, 188, 190, 191, 192, 195, 201, 203, 204, 205, 206, 208, 209, 210, 211, 214, 215, 216, 217, 221, 224, 225, 226, 227, 229, 230, 231, 233, 234, 237, 241, 242, 244, 247, 248, 249, 251, 252, 253, 254, 256, 257, 258, 261, 263, 268, 270, 271, 278, 279, 280, 281, 282, 283, 284, 285, 286, 288, 289, 290, 292, 294, 296, 297, 298, 299, 300, 302, 304, 305, 309, 310, 312

२४. समवृत्तम् - 22

२५. स्रग्धरा - 11, 35, 101, 243, 293

२६. सीसम् - 49, 102, 104, 110, 111, 171, 287, 303, 306

२७. हरिणी - 14, 84, 144, 200, 262, 274

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

ISBN 978-93-80171-48-7